M. S. University Oriental Series
No. 4

Gīrvāṇapadamañjarī and Gīrvāṇavāṅgmañjarī

Introduction etc. to these texts will appear in the subsequent issues of this Journal.

Umakant P. Shah.

॥ गीर्वाणपदमञ्जरी[१] ॥

श्रीगणेशाय नमः ।

केवलवैदिकानां व्यवहारार्थं कतिपयसंस्कृतपदानि मया विलिख्यन्ते[२] ॥

"अरे मया स्नानार्थं गम्यते[३] ।
"शीघ्रं गन्तव्यम्[४] । पाकस्तु जातः ।"
"कति ब्राह्मणाः भोजनार्थमानेयाः[५] ।"
"एक एव ब्राह्मणः आनेयः ।

"स्नानसामग्री तर्हि दातव्या । जलपात्रं ग्राह्यम् । कुशाः ग्राह्याः । तिलाः ग्राह्याः[६] । खड्गपात्रं ग्राह्यम् । तिलकसाधनं ग्राह्यम् । शुद्धवस्त्रं ग्राह्यम् । उत्तरीयं ग्राह्यम् ।"

एतत्सर्वं गृहीत्वा **मणिकर्णिकायां** गत्वा यथाविधि स्नात्वा[७] संन्यासिनां समुदाये गत्वा दण्डप्रणामं कृत्वा "स्वामिनः भिक्षार्थं आगन्तव्यम्" इति प्रार्थितवान्[८] । स्वामिनः ऊचुः—

"कति संन्यासिन अपेक्षिताः[९] । **द्राविडाः** वा अपेक्षिताः । **आन्ध्राः**[१०] वा अपेक्षिताः । **कार्णाटकाः** वा अपेक्षिताः । **महाराष्ट्राः** वा **आभीराः**[११] वा अपेक्षिताः । **गौर्जराः**[१२] वा अपेक्षिताः । **गौडाः** वा अपेक्षिताः । **मैथिलाः** वा अपेक्षिताः । **औत्कलाः**[१३] वा अपेक्षिताः । **कान्यकुब्जाः** वा अपेक्षिताः । **सारस्वताः** वा अपेक्षिताः ।"

"एकः **कार्णाटकोऽ**पेक्षितः ।"
"कुत्र स्थीयते भवता ।"
"काश्यां स्थीयते मया ।"

"काश्यामपि क्व स्थीयते त्वया । **राजघट्टे** वा स्थीयते, **गोघट्टे** वा स्थीयते,[१४] **त्रिलोचनघट्टे** वा स्थीयते । [१५]**ब्रह्मघट्टे** वा विद्यते **दुर्गाघट्टे** वा विद्यते, **बिन्दुमाधवघट्टे** वा विद्यते, **मङ्गलागौरीघट्टे** वा स्थीयते । **रामघट्टे** वा स्थीयते । **अग्नीश्वरघट्टे** वा स्थीयते । **नागेश्वरघट्टे** वा स्थीयते । **वीरेश्वरघट्टे** वा स्थीयते । **सिद्धिविनायकघट्टे** वा तिष्ठसि त्वम् । **स्वर्गद्वारप्रदेशे** वा तिष्ठसि त्वम् । **मोक्षद्वारप्रदेशे** वा तिष्ठसि त्वम् । **गङ्गाकेशवपार्श्वे** वा तिष्ठसि त्वम् । **जरासंधघट्टे** वा वर्त्तसे त्वम् । **वृद्धादित्यघट्टे** वा वर्त्तसे

---

१ B. on folio 1a has ॥ अथ बृहद्भाषामंजिरि प्रारम्भः ॥ The text begins on Folio 1b in B. O has no title on folio 1a and the text begins on folio 1b.
२ O. omits केवल.....विलिख्यते ॥ ३ N.B. गन्तव्यं. ४ B—शीघ्रं गन्तव्य । O omits ५ O—अरेयाः ६ O—omits तिला ग्राह्याः । ७ O—स्नानं कृत्वा ८ O—प्रार्थयेत् । ९ N & B add after this, कियन्तः संन्यासिनः अपेक्षिताः । १० O—अंध्रा ११ O & B—अभीरा N—आभीरा. १२ O—गुर्जरा १३ O—औत्कना B—औकुला १४ B omits १५ O omits ब्रह्मघट्टे......मङ्गलागौरी घट्टे वा विद्यते ।

त्वम्। **सोमेश्वरघ०** वा स्थीयते। **दशाश्वमेधे** वा तिष्ठसि त्वम्। **चतुःषष्टियोगिनीघ०** वा वर्त्तसे त्वम्। [१]**सर्वेश्वरघ०** वा विद्यसे त्वम्। **मानसरोवरे** वा तिष्ठसि त्वम्। **केदारेश्वरघ०** वा स्थीयते। **रामेश्वरे** वा स्थीयते। **लोलार्के** वा स्थीयते। **असीसङ्गमे** वा स्थीयते। **वरुणासङ्गमे** वा स्थीयते।"

"बिन्दुमाधवघट्टे अहं तिष्ठामि स्वामिनः।"

"बिन्दुमाधवघट्टेऽपि कुत्र तिष्ठसि त्वम्। **लक्ष्मीनृसिंहसमीपे** वा तिष्ठसि त्वम्। [२]**पञ्चगङ्गेश्वरनिकटे** वा तिष्ठसि त्वम्। **आदिविश्वेश्वरनिकटे** वा तिष्ठसि त्वम्। **दक्षेश्वरसन्निधौ** वा तिष्ठसि त्वम्। **दुग्धविनायकनिकटे** वा तिष्ठसि त्वम्। **कालभैरवनिकटे** वा तिष्ठसि त्वम्।"

"दुग्धविनायकनिकटे तिष्ठाम्यहं स्वामिनः।"

"**दुग्धविनायकनिकटे** कस्य गृहे वर्त्तसे त्वम्। **तिम्माभट्टगृहे** वर्त्तसे त्वम्। **रामभट्टगृहे** वा वर्त्तसे त्वम्[३]। **शिवभट्टगृहे** वा वर्त्तसे त्वम्। [४]**लक्ष्मणभट्टगृहे** वा वर्त्तसे त्वम्। [५]**कृष्णभट्टगृहे** वा वर्त्तसे त्वम्। **नारायणभट्टगृहे** त्वं वर्त्तसे **भैरवभट्टगृहे** वर्त्तसे [वा]।

"शिवभट्टगृहे अहं वर्त्ते[६]।"

"**शिवभट्टगृहेऽपि पूर्वशालायां** त्वं विद्यसे। अथवा **दक्षिणशालायां** विद्यसे **पश्चिमशालायां** विद्यसे [७]**उत्तरशालायां** वा विद्यसे। **प्रासादे** वा विद्यसे।"

"उत्तरशालायां तिष्ठामो वयं स्वामिनः।"[८]

"तव नामधेयं कथं व्यवहरन्ति जनाः।"

"मम **नाम अलर्षियुधमखजक्रतुपुरन्दर**-गरुडध्वज-**वाजपेयीति** व्यवहरन्ति जनाः।"

"एतादृशं स्थूलं नाम धृतवानसि। त्वया किं किं पठितमस्ति।"

"**वेदचतुष्टयं साङ्गं** पठितमस्ति। **दर्शनषट्कं साङ्गं** [९]पठितमस्ति।"

"तेषां नामानि कानि।"

"**ऋग्वेदः। यजुर्वेदः। सामवेदः। आथर्वणवेदः**[१०]। इति चत्वारो वेदाः।"

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिष[११]**मिति षडङ्गानि।**

वैशेषिकं तर्कः साङ्ख्यं योगः मीमांसा वेदान्त इति षड् दर्शनानि[१२]।

"तेषां स्थानानि कानि। अङ्गानामुपाङ्गानां च।"

"मुखं व्याकरणं वेदस्य[१३] ज्योतिषं नेत्रमुच्यते।
निरुक्तं श्रोत्रमुद्दिष्टं[१४] छन्दसां विचितिः[१५] पदे॥
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान्प्रचक्षते[१६]।
गुदद्वारं न्यायशास्त्रं लिङ्गं वैशेषिकं स्मृतम्॥

---

१ O omits सर्वेश्वर....केदारेश्वरघट्टे वा स्थीयते। २ O omits पञ्चगङ्गेश्वर......दक्षेश्वरसन्निधौ वा तिष्ठसि त्वम्। ३ B & O omit ref. to तिम्माभट्ट & रामभट्ट. ४ B. and N. omit ५ O omits ६ O—वर्तते। ७ B repeats उत्तरशालायां विद्यसे। ८ O—अहं उत्तरशालायां तिष्ठामि स्वामिनः। ९ N. omits साङ्ग. O—पाठित० १० O—अथर्ववेदः ११ N. B.—ज्यौतिषमिति O—ज्योतिषः १२ O omits इति षड्दर्शनानि १३ N.B.—मुख्यं व्याकरणं तस्य १४ O—निरुक्तं छंदोश्रात्रमुद्दिष्टं। १५ O—विविति १६ O—प्रचक्षते

पृष्ठवंशस्तु मीमांसा साङ्ख्ययोगौ तु पार्श्वकौ ।
ब्रह्मरन्ध्रं तु वेदान्तमिति ज्ञात्वा पठेन्नरः ॥"
"अन्यत्किञ्चित्पठितमस्ति ।"
"काव्यं पठितं नाटकमपि पठितम्[1] । अलङ्कारमपठिषम्[2] ।
स्मृतिमपठिषम्[3] । सङ्गीतमपठिषम्[4] ।"

"अतिसमीचीनं जातम् । श्रोत्रियोऽसि । अयं त्रिविक्रमाश्रम आयास्यति भिक्षार्थम् । अनेन भवतां गृहं न ज्ञायते सहैव गृहीत्वा गृहे[5]गन्तव्यं त्वया ।"

"अवश्यं गृहीत्वा गम्यते मया ।"

ततः गृहे आगत्य—"अरे चरणप्रक्षालनार्थं स्वामिनामुदकं दातव्यम्" । इति उक्तवान् । ततो उदके दत्ते सति पादौ प्रक्षाल्य पीठे उपवेश्य[6] "स्वामिनां पूर्वाश्रमे को ग्रामः" इति पृष्टवान् ।

"अस्माकं पूर्वाश्रमे विद्यानगरम्[7]"
"तत्र किं किं वर्त्तते[8]"
"तत्र सर्वे पदार्थाः वर्त्तन्ते ।"
"तत्र के के पदार्थाः विद्यन्ते ।

"वज्र-वैडूर्य-गोमेध-पुष्पराग-मुक्ताफलादीनि सर्वरत्नानि सन्ति । सुवर्ण-रजत-ताम्रादीनि लोहानि सन्ति । समीचीनानि वस्त्राणि सन्ति । समीचीनं मलयचन्दनमस्ति । भीमसेनीकर्पूरमस्ति । कस्तूर्यस्ति । समीचीनानि क्रमुकफलानि सन्ति । नागवल्लीदलानि श्वेततराणि[9] सन्ति । उत्तमलवङ्गाः सन्ति । [10]नालिकेरफलानि वर्त्तन्ते । कदलीफलानि सन्ति । श्वेतपुनर्नवालताः सन्ति । निष्पावलताः सन्ति । ताम्बूलीलताः सन्ति । मरीचलताः सन्ति । द्राक्षालताः विद्यन्ते । गुडूचीलताः विद्यन्ते । सोमलताः विद्यन्ते । [11]फतीकतृणानि वर्तन्ते । [12]मूषकपर्णीलताः विद्यन्ते[13] । उत्तरणीलताः विद्यन्ते । वज्रवल्लीलताः सन्ति । गुञ्जालताः सन्ति । गोक्षुरकलताः सन्ति ।

अश्वत्थवृक्षाः सन्ति । वटवृक्षाः सन्ति । प्लक्षवृक्षाः सन्ति[14] । जम्बूवृक्षाः[15] सन्ति । [16]आम्रवृक्षाः सन्ति । सहकारवृक्षाः सन्ति । आमलकीवृक्षाः सन्ति । कुवलीवृक्षाः[17] सन्ति । [18]तिन्तिणीवृक्षाः सन्ति । निम्बूवृक्षाः सन्ति । कपित्थवृक्षाः सन्ति । दाडिमवृक्षाः सन्ति । पनसवृक्षाः सन्ति । बिल्ववृक्षाः सन्ति । मधुवृक्षाः सन्ति । नारङ्गीवृक्षाः सन्ति । जम्बीरवृक्षाः सन्ति । तमालवृक्षाः सन्ति । तालवृक्षाः सन्ति । क्रमुकवृक्षाः सन्ति । नारिकेलवृक्षाः सन्ति । शालवृक्षाः सन्ति । हरीतकीवृक्षाः सन्ति । निम्बवृक्षाः सन्ति । महानिम्बवृक्षाः सन्ति । खदिरवृक्षाः सन्ति । धववृक्षाः सन्ति । अशोकवृक्षाः सन्ति । कदलीवनानि

---

१ N.काव्यमपठिषम् । नाटकमपठिषम् । O—नाटकमपठितम् २ O—अलंकारं पठितं ३ O—स्मृतिमपठितं ४ O—सांगीतमपठितं ५ B—सहैव गृहीत्वा गन्तव्यं O—सहैव गृहे गंतव्यं ६ O—उपविश्य ७ O. B—विद्यानगरः ८ O—तत्र किं वर्त्तते । ९ O—श्वेततितराणि. १० B—नारीकेल. ११ O—फतीक्र B—पूतीक ? फतीक ? १२ O—मुषुपर्णी. १३ O adds कपित्थवृक्षाः सन्ति which is obviously an error here. १४ O omits वटवृ० and प्लक्षवृ० १५ O—जंबुकवृक्षाः १६ O adds अशोवक कदलीवनानी सं० १७ O—कदलीवृ० वेणवा सन्ति । १८ O omits तिन्तिणीवृक्षाः......धववृक्षाः सन्ति ।

सन्ति । वेणवः सन्ति । बदरीवृक्षाः सन्ति । खर्जूरीवृक्षाः सन्ति । [१]पारिजातवृक्षाः सन्ति । अर्कवृक्षाः सन्ति । स्तु(स्नु)हीवृक्षाः सन्ति । निर्गुण्डिवृक्षाः सन्ति । भूर्जवृक्षाः सन्ति । चम्पकवृक्षाः सन्ति । पाटलवृक्षाः सन्ति । कलिद्रुमाः[२] सन्ति । बकुलद्रुमाः सन्ति । पलाशतरवः सन्ति । शिग्रुतरवः सन्ति । [३]उदुम्बरतरवः सन्ति । अर्जुनतरवः सन्ति ।

इक्षुगुल्माः सन्ति । [४]एलागुल्माः वर्त्तन्ते । [५]धत्तूरगुल्माः वर्त्तन्ते । [६]केतकीगुल्माः वर्त्तन्ते । बृहतीगुल्माः वर्त्तन्ते । [७]कण्टकाटी(री)गुल्माः वर्त्तन्ते । [८]चित्रकगुल्माः वर्त्तन्ते । [९]महाटी (?) गुल्माः वर्त्तन्ते । करवीरगुल्माः वर्त्तन्ते । जातीगुल्माः वर्त्तन्ते । मल्लीकागुल्माः वर्त्तन्ते । मालतीगुल्माः वर्त्तन्ते । [१०]शृङ्गवेरगुल्माः सन्ति । हरिद्रागुल्माः सन्ति । अपामार्गगुल्माः सन्ति । तुलसीगुल्माः सन्ति ।

बन्धूकपुष्पाणि सन्ति । पाटलपुष्पाणि सन्ति । पुन्नागपुष्पाणि सन्ति । केतकीपुष्पाणि सन्ति । [११]कादम्बपुष्पाणि सन्ति । [१२]जपाकुसुमानि सन्ति । बिल्वपत्राणि विद्यन्ते । तुलसीपत्राणि विद्यन्ते । तुलसीदलानि सन्ति । जातीकुसुमानि सन्ति । मल्लिकाकुसुमानि सन्ति । चम्पककुसुमानि सन्ति । करवीरकुसुमानि सन्ति । बकुलकुसुमानि विद्यन्ते । अरविन्दपुष्पाणि सन्ति । कुमुदपुष्पाणि सन्ति । कुवलयपुष्पाणि सन्ति । [१३]उत्पलपुष्पाणि सन्ति ।

महान्ति सरांसि विद्यन्ते । [१४]सरसी विद्यते । स्वामिनः तडागानि विद्यन्ते[१५] ।"

इत्युक्ते, —

"किं नद्यः न सन्ति । दक्षिणदेशे बह्व्यः नद्यः वर्त्तन्ते । काकानदी वर्त्तते । ताम्रपर्णी वर्त्तते । घृतम(मा)ली[१६] वर्त्तते । कावेरी वर्त्तते । पयस्विनी वर्त्तते । तुङ्गभद्रा वर्त्तते । कृष्णवेणी[१७] वर्त्तते । गोदावरी वर्त्तते । एताः महानद्यः अन्या बह्वः नद्यः असङ्ख्याताः सन्ति ।"

"स्वामिनः भवतां देशे कानि कानि तीर्थानि सन्ति ।"

"सेतुबन्धरामेश्वरो वर्त्तते । कन्याकुमारी वर्त्तते । अनन्तसेनक्षेत्रं वर्त्तते । [१८]जनार्दनक्षेत्रं वर्त्तते । गोकर्णक्षेत्रं वर्त्तते । महाबलेश्वरतीर्थं वर्त्तते । पुण्डरीकपुरक्षेत्रं वर्त्तते । त्र्यम्बकक्षेत्रं वर्त्तते । नासिकाक्षेत्रं[१९] वर्त्तते । धर्मपुरीक्षेत्रं वर्त्तते । गोदावरीसङ्गमोऽस्ति । कृष्णासङ्गमोऽस्ति । कावेरीसङ्गमोऽस्ति । ताम्रपर्णीसङ्गमोस्ति । श्रीशैलक्षेत्रमस्ति[२०] । काञ्चीक्षेत्रमस्ति । सुब्रह्मण्यतीर्थमस्ति । शङ्करनारायणक्षेत्रमस्ति । वेङ्कटाचलक्षेत्रमस्ति । कालहस्तिक्षेत्रमस्ति । अन्यान्यपि तीर्थान्यनेकानि वर्त्तन्ते ।"

"स्वामिनः अतः परं भिक्षा भवतु ।"

---

१ O omits पारिजात....अर्कवृक्षाः सन्ति । २ O—कलिंद्रूमाः ३ B—उदम्बर० ४ O—एतागुल्माः ५ O—धतूर० B—धत्तूर ६ The order of गुल्माः adopted in the text is from B. O mentions करवीर गुल्माः after धतूर०, बृहतीगु० जातकी०, मल्लीका and मालती० after केतकीगुल्मा, but before कण्टकारीगु० ७ B—कंटकाटी० O—कंटिकारा ८ O—चित्रगुल्माः ९ B—महाटी० O—महांढि० १० O—श्रृंगवेश ११ O—कदंब १२ O—जवा० १३ O omits कुवलय० १४ O omits सरसी विद्यन्ते । १५ B repeats. १६ B—घृतमली० O—घृतमाली० १७ O—कृष्णवेण. १८ C begins here on Folio 6a. Other Folios are missing. १९ O—नासिक्षे० २० O—कांचि०

“ मया किं कर्तव्यम् । भवद्भिरेव परिवेषणं न कार्यते । प्रायः पाको न जातः । पाको जातश्चेत्परिवेषणं कार्यताम् । ”

“ अतः परं कार्यते मया । ”

“ शीघ्रं कार्यताम् । ”

[इत्युक्ते सः स्वामिनं] स्थूलरम्भाग्रपत्रं दत्वा दशपत्रपुटानि [च] दत्वा सर्वसामग्रीसहितव्यञ्जनानि दापयित्वा[1] शाल्योदनं दापयित्वा यथासुखं भोजितवान् । भोजनानन्तरम्—

“ अरे स्वामिनां हस्तप्रक्षालनार्थमुदकं देयम्[2] । मृत्तिका दातव्या । दन्तशोधनार्थं शलाका दातव्या । ”

हस्तप्रक्षालनानन्तरं स्थूलपीठे उपवेश्य शुद्धाऽचमनार्थमुदकं दत्वा शुद्धाचमनानन्तरं श्रीचन्दनं कस्तूरीकर्पूरसहितं सर्वशरीरे लापयित्वा मुष्टिपरिमितलवङ्गान्दत्वा नानाविधपुष्पमालाः कण्ठे दत्वा समीचीनममूल्यवस्त्रद्वयं दत्वा साष्टाङ्गदण्डवत्प्रणामं कृत्वा—

“ भो स्वामिनः अतिकालो जातः । शाकपाकादिकं किमपि न जातम् । ”

इति प्रार्थितवान् । बहुधा [3]प्रार्थनाऽनन्तरं श्रीपादाः वदन्ति—

“ [4]नारायण अतीव सम्भ्रमो जातः । ”

“ भवद्भिः कम्बलोपरि उपविश्यताम् स्वामिनः । ”

“ उपविश्यते । ”

कम्बलोपर्युपवेशनानन्तरं गृहमध्ये यावन्तः स्थिताः ते सर्वे नमस्कारार्थमागताः । स्वामिनः ऊचुः—

“ एते के के वर्त्तन्ते । ”

“ अयमस्माकं पिता भवति । इयमस्माकं माता भवति । अयमस्माकं पितामहो भवति । इयमस्माकं पितामही भवति । अयमस्माकं प्रपितामहो भवति । इयमस्माकं प्रपितामही भवति[5] । अयं मम ज्येष्ठभ्राता भवति । इयं मम ज्येष्ठा भगिनी भवति । अयं मम कनिष्ठभ्राता भवति । इयं मम कनिष्ठा भगिनी भवति । एते मम ज्येष्ठपितृव्या भवन्ति । एते मम कनिष्ठपितृव्या भवन्ति । इयं पितृभगिनी भवति । इयं मातृभगिनी भवति[6] । अयं मातुलो भवति । इयं मातुलानी भवति । इयं

---

१ O—स्थूलरंभाग्रपात्रं दत्वा । पत्रपुटानिदत्वा सर्वसामग्री गृहीत्वा व्यंजनानि दापयित्वा ।
B—स्थूलरंभाग्रपत्रं दशपत्रपुटानिदा सर्वसामग्रीसहितव्यञ्जनानि etc.

२ C & B—दातव्यं

३ O—बहुप्रार्थना०

४ C—नारायण नारायण नारायण अतीतसम्भ्रमो०

५ C—adds अयमस्माकं प [प्र] पितामहो भवति । इयमस्माकं प्रपितामही भवति ।

६ B, O and C add here इयं पितृस्वसा भवति । इयं मम मातृस्वसा भवति । But this would be redundant in view of पितृभगिनी and मातृभगिनी noted above. The use of the word स्वसृ can be shown by emending the text as इयं पितृस्वसा भवति । इयं मातृभगिनी भवति । However since all mss. give the above text, we have to take इयं पितृस्वसा....इयं मम मातृस्वसा...... । as a probable later addition.

मम भार्या भवति । अयं मम पुत्रो भवति । इयं मम कन्या भवति । अयं मम[१] जामाता भवति । अयं मम पौत्रो भवति । अयं मम दौहित्रो भवति । अयं मम शा(श्या)लको[२] भवति । अयं मम प्रपौत्रो भवति । [३]अयं श्वशुरो भवति । इयं श्वश्रूर्भवति । अयं भावुको भवति । एते आचार्याः भवन्ति । एताः आचार्यान्यः भवन्ति । एतानि मित्राणि भवन्ति । अयं मम सखास्ति[४] । अयं मम सेवकोऽस्ति । इयं मम दासी वर्तते । अन्ये मम सम्बन्धिनः सन्ति ।"

"अति समीचीनं जातम् । इदं सर्वं दृष्ट्वा अतिसंतोषो जातः मम ।"

"हे स्वामिनः भवद्भिः किं किं पठितम्[४] ।"

"सर्वं मया पठितं[५] वर्त्तते ।"

"कस्मिन्शास्त्रे अतिकाठिन्यमस्ति ।"

"भवद्भिर्न ज्ञायते वा ।"

"मया ज्ञायते यद्यपि तथाऽपि[६] भवन्तो वदन्तु ।"

स्वामिनः ऊचुः—

"व्याकरणे अतीव काठिन्यं वर्त्तते ।"

"इदं किं कस्मिन् शास्त्रे इति पृष्टे[७] व्याकरणे इति उच्यते ।"

"मया समीचीनमुच्यते । तत्कथमिति चेत्[८] श्रुणु शास्त्रशब्देन वेदः उच्यते । वेदस्यैव शास्त्रशब्दव्यवहारो मुख्यः । व्याकरणे गौणः दर्शनेषु तु अतीव गौणः । तत्कथमिति चेत्[९] श्रुणु । व्याकरणं मुख्यमङ्गं भवति वेदस्य । दर्शनानि तु गौणान्यङ्गानि भवन्ति वेदस्येत्युक्तमेव ।"

"स्वामिनः व्याकरणं विहाय अन्यानि दर्शनानि कथं पठन्ति लोकाः ।"

"भ्रान्ता एवैते । कथमिति चेत्, श्रुणु ।

"पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना । इत्येतत्सर्वं व्याकरणं विना केनाऽपि अवैयाकरणेन न ज्ञायते । तस्माद्व्याकरणं अतीव कठिनं भवति । किं च तर्कवैशेषिकादीनि कानिचिद्दर्शनानि[१०] निषिद्धानि वर्त्तन्ते । तथा हि—आदिपर्वणि भीष्मोत्पत्तिकथाऽनन्तरं पाण्डुः कुन्त्यै आह—

स वै दीर्घतमा [११]नामोतथ्यजोगुरुशापतः ।
स पुत्राञ्जनयामास गो(गौ)तमादीन्महायशाः ।
लोभमोहाभिभूतास्तु पुत्रास्ते गो(गौ)तमादयः । इति ।

अतएव हयशीर्षपञ्चरात्रे—

कपिलश्चाक्षपादश्च नास्तिको नग्न एव च ।
ऋषयस्तामसा एते[१२] शास्त्रमेषां विमोहनम् ॥ इति ॥

---

१ B omits मम २ C—शालो० ३ B adds अयं मम प्रप्रपौत्रो भवति । C—अयं मम प्र [प्र] पौत्रो भवति । ४ O—एते संख्यास्ति । B—अयं मम सख्यास्ति । ५ B & C—पाठितं ६ O—omits तथाऽपि ७ B & O—पृछे ८ O—वक्तव्यमिति चेत् ९ O—वक्तव्यमिति चेत् १० B—०कानि दर्शनानि ११ O—उक्तथ्थजो B—०तत्थायो C—नामोत्थ्यजो । १२ O—तामसगते

मोक्षधर्मे—

आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थकां ।[१]
हेतुवादान्ब्रुवन्सत्सु विजेता ब्राह्मणादिषु[२] ॥
यस्येयं फलनिष्पत्तिः शृगालत्वं मम द्विज ।[३]
न तर्कशास्त्रविदग्धाय न वाच्यं पिशुनाय वा[४] ॥ इति ॥

दानधर्मे—

आन्वीक्षिक्यां सदासक्तं नरश्वानं च तं विदुः ।

आदित्यपुराणे—

बौद्धा वैशेषिका जैना भविष्यन्ति कलौ युगे ।

पद्मपुराणे—

काणादं गौतमं शक्तिमुपमन्युं च जैमिनिम् ।[५]
(कणादः गौतमः शक्तिरुपमन्युश्च जैमिनिः ।)
ऋषयस्तामसा एते [६]तेषां शास्त्रं विमोहनम् ॥
मच्छक्त्याऽवेशितैरेतैरभेदो [७]मम गोपितः ॥

रामायणे अयोध्याकाण्डे—

शास्त्रेष्वन्येषु मुख्येषु विद्यमानेषु दुर्बुधाः ।
बुद्धिमान्वीक्षिकीं प्राप्य निरयं प्रपयन्ति[८] ते ।
भवेत्पण्डितमानी यो ब्राह्मणो वेदनिन्दकः ।
आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम् ।
हेतुवादान्ब्रुवन्सत्सु विजेता हेतुवादिकः[९] ।
आक्रोष्टा चाभिवक्ता च ब्राह्मणानां सदैव हि ।
सर्वाभिशङ्की[१०] मूढश्च बालः कटुकवागपि ॥
बोद्धव्यस्तादृशस्तात नरश्वानं हि तं विदुः ।
यथा श्वा भक्षितं चैव हन्तुं चैवावसृज्यते ।
एवं सम्भाषणार्थाय सर्वशास्त्रवधाय च[११] ॥

मिताक्षरायाम्—

हैतुकान्बकवृत्तींश्च वाङ्मात्रेणाऽपि नार्चयेत् ।

---

१ O—निरर्थिको. B & C—निरर्थिकां २ C—ब्रह्मणादिषु ३ O—द्विजः । B—द्विजा । ४ B—च ५ C—जैमिनि । ६ C—शास्त्रमेषां ७ O & B—०रेतै भेदो० ८ B—निरय प्रपयंति० O—निरयं प्रपयन्तेत्ति । C—निरयं प्रपयंति ते । ९ C—विजेतां हेत्वादिकः । O—विजेता हेतुवादिकः । B—विजेत्ता हेतुवादिकः । १० C—सर्वाभिःशंकी० B—सर्वभिः शंकी O—सर्वश्विभिः शकि ११ C—एवं संभारणार्थ य० O—एवं शंभाषणार्थी य B—एव संभाषणार्थाय (Passage not traceable in printed edition of Rāmāyana, Southern Recension.)

तर्काप्रतिष्ठानादिति **व्याससूत्रम्** । (ब्र. सू. २-१-११)

नैषा तर्केण मतिरापनेया इति श्रुतिः । (का. १-२-९)

पाद्मे पार्वतीं प्रति ईश्वर आह—

मच्छक्त्यावेशितैर्विप्रैस्सम्प्रोक्तानि ततः परम् ।
काणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत् ॥
गोतमेन[1] तथा न्यायं साङ्ख्यं तु कपिलेन वै ।
द्विजन्मना जैमिनिना पूर्वेदमयथार्थतः[2] ॥
निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम् ॥ इति ।

पाराशरोपपुराणे[3]—

अक्षपादप्रणीते च काणादे साङ्ख्ययोगयोः ।
त्याज्यः श्रुतिविरुद्धांशो श्रुत्यैकशरणैर्नृभिः ॥
जैमिनीये च वैयासे विरुद्धांशो न कश्चन ॥ इति ।

ब्रह्मवैवर्त्ते काशीमाहात्म्ये—

तर्कशास्त्रं पठित्वाऽत्यन्तं परिभाव्य महातार्किको जातः । तदनन्तरमगम्यागमनादिकं कृत्वाऽपेयपानादिकं च कृत्वा मातुलानीभक्षणं च कृत्वा स्थितवान् बहुकालपर्यन्तं पापी चिरायुरिति न्यायात् । ततः मृतः नष्टदेशे गत्वा पश्चात्कदर्यदेशे कलिवृक्षोपरि महापिशाचो भूत्वा बहुकालपर्यन्तं स्थितः द्वि[ज]जेता[4] नाम कश्चन ब्राह्मणः—इत्यादि सर्वत्र श्रूयते ।

अत एव **बृहदारण्यकभाष्ये आचार्यचरणैरुक्तम्**—

पुच्छविषाणहीनास्तार्किकबलीवर्दाः प्रत्यवतिष्ठन्त इति । तस्माद्वैशेषिके तर्के च अत्यन्तं न पठनीयमित्येव प्रतीयते । "

वाजपेयी आह—

" सत्यम् । तर्के[5] पठित्वा वक्तारो भवन्ति तदर्थं तर्के पठनीयम् । "

" भ्रान्तोऽसि । तर्के पठित्वाऽपि मूकवद्[6] दृश्यन्ते सभायाम् । व्याकरणमायाति चेत्सर्वशास्त्रेषु सिंहसदृशा भवन्ति वैयाकरणाः । तत्कथमिति चेत्, श्रुणु—भाष्योच्छिष्टं जगत्त्रयमिति प्रसिद्धेः ।

" व्यासोच्छिष्टं जगत्त्रयमित्यपि श्रूयते स्वामिनः । "

" सत्यम् । श्लोकांशे तत् ।

" स्वामिनः कस्मिन्कस्मिन्शास्त्रे श्रीमद्भिः पठितम् । "

" मया सर्वत्र पठितम् ।

" क्व सर्वत्र । "

---

१ O & C—गौतमेन० २ O—पूर्वेदमयथार्थतः । B—पूर्वे वेदमपार्थतः । C—पूर्वं वेदमपार्थतः । ३ C—पाराशरपुराणे O & B—पाराशरोय (प) पुराणे ४ O & C—द्विजसेना नाम० ५ C—तर्के. O & B—तर्क० ६ B—मूकका.

" [१]महाभाष्यमपाठिषमहम् । [२]कैय्यटमहं अपाठिषम् । [३]काशिकापुस्तकमहमपाठिषम् । [४]पदमञ्जरीमपाठिषमहम् । अनुन्यासरक्षितसहितं [५]न्यासमपाठिषमहम् । [६]धातुवृत्तिपुस्तकानि अपाठिषमहम् । [७]परिभाषापुस्तकान्यपाठिषमहम् । [८]उणादिवृत्तिपुस्तकान्यपाठिषमहम् । [९]फिट्सूत्रवृत्तिपुस्तकान्यपाठिषमहम् । [१०]लिङ्गानुशासनवृत्तिपुस्तकान्यपाठिषमहम् । उपसर्गवृत्तिमपाठिषमहम् । निपातवृत्तिपुस्तकान्यपाठिषमहम् । [११]मनोरमासहित[१२]सिद्धान्तकौमुदीमपाठिषम् । [१३]मध्यसिद्धान्तकौमुदीमपाठिषम् ।

[१४]लघुसिद्धान्तकौमुदीमपाठिषम् । [१५]शब्दकौस्तुभमपाठिषमहम् । अन्यान्यपि व्याकरणे बहूनि पुस्तकानि सन्ति । तानि सर्वाण्यपाठिषमहम् ।

---

१ Mahābhāṣya of Patañjali, c. 150 B. C. well-known.

२ Kaiyyaṭa wrote a comm. on Mahābhāṣya of Patañjali.

३ Kāśikāvṛtti is the joint production of Jayāditya and Vāmana and, acc. to It-sing, Jayāditya died in c. 661 A. D. In a well-known verse—अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना । शब्दविद्येव नो भाति राजनीतिरपस्पशा । Māgha refers to Kāśikāvṛtti and its comm. the Nyāsa.

४ Composed by Haradatta who quotes Māgha by name. Jinendrabuddhi in his Nyāsa freely copied from Padamañjarī.

५ Nyāsa of Jinendrabuddhi on the Kāśikāvṛtti is later than Haradatta's Padamañjarī and Māgha's Śiśupālavadha, as shown by Kielhorn, JRAS (1908), p. 499. A ms. of Śiṣyahitānyāsa, composed by Ugrabhūti on Kātantra-Śiṣyahitāvṛtti, is recently discovered and is being edited for the G. O. Series by Dr. V. S. Agrawala. The Nyāsakāra mentioned by Bhāmaha may not be Jinendrabuddhi.

६ *E*.g. Mādhavīyā Dhātuvṛtti by Sāyaṇa.

७ *E*.*g*. Paribhāṣenduśekhara of Nāgojī Bhaṭṭa.

८ C omits. Commentaries on Uṇādisūtras, *e*.*g*. works of Śvetavanavāsī, Sarvajñanārāyaṇa, Ujjvaladatta, Bhaṭṭojī Dīkṣita.

९ O omits.

१० There are several works of the name. One work Liṅgānuśāsana of Vāmana with Vṛtti is published in G. O. Series No. 6. Liṅgānuśāsana of Durgasimha is published by the Deccan College Post-Graduate Research Institute, Poona.

११ Manoramā is the famous comm. of Bhaṭṭojī Dīkṣita on Siddāntakaumudī.

१२ Siddhāntakaumudī composed by Bhaṭṭojī Dīkṣita.

१३ O omits. Madhyasiddhāntakaumudī is by Varadarāja (c. 17th cent., A. D.) the author of our text.

१४ Also by Varadarāja.

१५ By Bhaṭṭojī Dīkṣita.

वेदान्ते, विवरणे[१] पाठ्यते । कल्पतरुसहितवाचस्पत्ये[२] पाठ्यते । शारीरकीयं भाष्यं[३] पाठ्यते। सुरेश्वरवार्त्तिकं[४] पाठ्यते ।

मीमांसायां, [५]शास्त्रदीपिकामपाठिषम् । [६]तन्त्रवार्त्तिकं सराणकमपाठिषम् । [७]तन्त्ररत्नमपाठिषम् । [८]शाबरभाष्यमपाठिषम् ।

तर्के, [९]चिन्तामणिमपाठिषम् । [१०]शिरोमणिमपाठिषम् । [११]मिश्रमपाठिषम् ।

वैशेषिके, [१२]प्रशस्तपादभाष्यमपाठिषम् । [१३]वर्द्धमानसहितकिरणावलीमपाठिषम् ।

---

१ Vivaraṇa is Pañcapādikāvivaraṇa of Prakāśātman (c. 1200 A. D.).

२ Vācaspatya is the Bhāmātī comm. by Vācaspati Miśra (c. 840 A.D.) on Brahmasūtra-Śaṅkara-bhāṣya, while *Kalpa-taru* is a comm. on Bhāmatī by Amalānanda in the middle of the thirteenth century.

३ Śārīrakīyam is the Bhāṣya of Śaṅkara on Bādarāyaṇa's Brahmasūtras.

४ Sureśvaravārtika is a comm. on Śaṅkara's Bhāṣya on the Bṛhadāraṇyaka upaniṣad, by the latter's direct disciple Sureśvarācārya.

५ Śāstradīpikā composed by Pārthasārathimiśra (c. 900 A. D.).

६ Tantravārtika of Kumārilabhaṭṭa (c. 700 A. D.). Rāṇaka is the Nyāyasudhā comm. by Someśvara (c. 1500 A. D.) on Tantravārtika.

७ Tantraratna composed by Pārthasārathimiśra.

८ Śābarabhāṣya on Jaimini's Pūrvamīmāmsā-Sūtras, composed by Śabarasvāmin.

९ Cintāmaṇi is the Tattva-Cintāmaṇi of Gaṅgeśopādhyāya (c. 1175 A. D.).

१० Śiromaṇi is a comm. on Tattva-Cintāmaṇi (of Gaṅgeśopādhyāya), by Raghunātha Bhaṭṭa (c. 1300 A. D.). It is also called Dīdhiti.

११ May be Tarkabhāṣā of Keśavamiśra or works of Vācaspatimiśra—such as Nyāyavārtika-tātparyaṭīkā, Nyāyasūcinibandha etc. ; or Jayadevamiśra's (c. 1278 A. D.) Tattva-Cintāmaṇi-ṭīkā (Tattvāloka) and Haridāsamiśra's Tattvālokaṭīkā, or Śaṅkaramiśra's (c. 1625 A. D.) Jāgadīśī-ṭīkā.

१२ Praśastapāda-bhāṣya on Kaṇāda's sūtras.

१३ Kiraṇāvali is a ṭīkā, on Praśasta-pāda-bhāṣya, by Udayanācārya (c. 984 A. D.). Varddhamāna (c. 1150 A. D.) wrote his Kiraṇāvali-prakāśa, a comm. on the Kiraṇāvali of Udayanācārya.

[1]साङ्ख्येऽपि, [2]साङ्ख्यभाष्यं सटिप्पणमपाठिषम् । योगेऽपि [3]व्यासभाष्यसहित [4]पातञ्जल-सूत्राण्यपाठिषम् । [5]योगवाचस्पतिमपाठिषम् ।

[6]नैषधकाव्यमपाठिषम् । [7]रघुवंशकाव्यमपाठिषम् । कुमारसम्भवमपाठिषम् । मेघदूतमपाठिषम् । [8]माघमपाठिषम् । [9]किरातमपाठिषम् । अन्यत्पुस्तकमात्रमपाठिषम् ।"

"स्वामिनः अतिसमीचीनं क्रियते श्रीमद्भिः । कालक्षेपः समीचीनं जायते भवताम् । स्वामिनः भवतां देशे पलाण्डुभक्षणं कुर्वन्तीति श्रुतं वर्त्तते मया । लशुनभक्षणं कुर्वन्तीति श्रुतं वर्त्तते मया । तत्सत्यं वा [न] ।

"एवं मूढा वदन्ति । ये अशिष्टाः पतिताः [10]अब्राह्मणाश्च [ते] भक्षयन्ति समीचीना न भक्षयन्त्येव ।"

"स्वामिनः अपराधाः क्षन्तव्याः । मया अज्ञात्वा पृष्टम् ।"

"हे वाजपेयिनः भवतां देशः कः ।"

"मम [11]कान्यकुब्जदेशः ।"

"तत्र किं किमस्ति ।"

"स [12]मध्यदेशो भवति । तत्र सर्वमस्ति । तथा हि—

---

1 C—omits अपि O—०सटिप्पणपाठि.

Kapila is said to be the propagator of the Sāmkhya system. Sāmkhya-sūtras, Kapila-Samhitā, Kapila-Pañcarātra etc. are ascribed to him. Ṣaṣṭitantra of Vārṣagaṇya (c. 100 A. D.) and Sāmkhya-kārikā of Īśvarakṛṣṇa (c. 2nd cent. A. D.) are amongst chief early texts of the system.

2 Sāmkhya-bhāṣya is the bhāṣya by Gauḍapādācārya (c. 600-700 A. D.) on the Sāmkhyakārikās of Īśvarakṛṣṇa.

3-4 Vyāsa-bhāṣya is the Yogasūtrabhāṣya by Vyāsa (c. 100 A. D. ?) on the Yoga-Sūtras of Patañjali.

4 C omits योगेऽपि....योगवाचस्पतिमपाठिषम् ।

5 Yoga-vācaspati is the Tattva-vaiśāradī, the Yoga-Sūtra-bhāṣya-ṭīkā by Vācaspatimiśra (c. 9th cent. A. D.).

6-9 The well-known Mahākāvyas of Śrīharṣa (Naiṣadha) Kālidāsa, (Raghu०, Kumāra and Meghadūta), Māgha (Śiśupālavadha) and Bhāravī (Kirātārjunīyam).

10 O—ब्राह्मणाश्च.

11 Kanauj.

12 For the definition of Madhyadeśa, vide, Manu, II. 21, which defines Madhyadeśa as the country between the Himalaya and Vindhya mountains, which is to the east of Vinaśana (*i.e.* the dry bed of Sarasvatī where it disappears) and west of Prayāga. For Madhyadeśa, also see, Law, B. C., Historical Geography of Ancient India.

यवास्सन्ति । व्रीहयस्सन्ति । चणकास्सन्ति । माषास्सन्ति । राजमाषास्सन्ति । मुद्गास्सन्ति । सर्षपास्सन्ति । अतस्यस्सन्ति । तिलास्सन्ति । मसूरास्सन्ति । यवनालास्सन्ति । प्रियङ्गवस्सन्ति । श्यामकाः वर्त्तन्ते । कोद्रवाः वर्त्तन्ते । [१]अन्यान्यपि धान्यानि वर्त्तन्ते ।

शर्कराऽस्ति । गुडोऽस्ति[२] । खण्डशर्कराऽस्ति । द्राक्षाफलानि सन्ति । खर्जूरफलानि सन्ति । कदलीफलानि सन्ति[३] । कपित्थफलानि सन्ति । बदरीफलानि सन्ति । आम्रफलानि सन्ति । सहकारफलानि[४] सन्ति । [५]कण्टकिफलानि सन्ति । निम्बूफलानि सन्ति । जम्बीरफलानि सन्ति । [६]चुक्रमस्ति । तिन्तिणीफलमस्ति । [७]चित्राफलमस्ति । नारङ्गीफलानि सन्ति । दाडिमफलानि सन्ति । [८]कर्कटीफलानि सन्ति । जम्बूफलानि सन्ति । भल्लातकफलानि सन्ति । अन्यान्यपि बहूनि फलानि सन्ति ।

सैन्धवलवणमस्ति । सामुद्रिकलवणमस्ति । साम्भरलवणमस्ति ।

दुग्धमस्ति । दधि वर्त्तते । तक्रमस्ति । [९]उदश्विन्वर्त्तते । मथितं वर्त्तते । आमिक्षा वर्त्तते । नवनीतं वर्त्तते । फाण्टं वर्त्तते[१०] । घृतमस्ति । सर्षपतैलमस्ति । अतसीतैलमस्ति । [११]कुसुम्भतैलमस्ति । तिलतैलमस्ति[१२] । [१३]एरण्डलतैलमस्ति । निम्बतैलमस्ति[१४] । मधु वर्त्तते ।

शुण्ठी-पिप्पली-मरीचानि सन्ति । कटुकरोहिणी वर्तते । पिप्पलीमूलमस्ति । जीरकमस्ति । रामठं वर्त्तते । आमलकी वर्त्तते । विभीतकोऽस्ति । ”

“ वाजपेयिनः, जन्तवः के के वर्त्तन्ते भवतां देशे । ”

“ मनुष्यास्सन्ति । शरभ-शार्दूल-गण्डभेरण्डाः वर्त्तन्ते । सिंहाः सन्ति[१५] । गजास्सन्ति[१६] । करेणवः सन्ति । व्याघ्राः सन्ति । व्याघ्र्यः सन्ति[१७] । भल्लूकाः सन्ति[१८] । भल्लूक्यः सन्ति[१९] । वृकाः सन्ति । वृक्यः सन्ति । वराहाः सन्ति । वराह्यः सन्ति । शृगालाः सन्ति । क्रोष्ट्र्यः सन्ति । श्वा वर्त्तते । शुनी वर्त्तते[२०] । अश्वाः वर्त्तन्ते । वडवाः वर्तन्ते । गर्दभा वर्त्तन्ते । गर्दभ्यः सन्ति । महिषाः वर्तन्ते । महिष्यः सन्ति । बलीवर्द्दाः सन्ति । गावः सन्ति । छागाः सन्ति । छाग्यः सन्ति । अवयस्सन्ति । पशवस्सन्ति । मूषकास्सन्ति । सर्पास्सन्ति । नकुलाः सन्ति । मार्जाराः सन्ति[२१] । सरटाः सन्ति । पल्यः सन्ति । मक्षिकास्सन्ति । मशकाः सन्ति । मत्कुणाः सन्ति ।

“ वाजपेयिनः भवतां देशे कानि कानि तीर्थानि सन्ति । ”

---

१ O omits. C...... ०बहूनि वर्त्तन्ते । २ C omits. ३ C omits खर्जूर......कदली......सन्ति । ४ Cf. अमरकोश, 715—आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः । Sahakāra is a very fragrant variety of mango-fruit (āmra). ५ C—कंटक. O—कंटकी० ६ O—चुक्रमस्ति । B & C—शुक्र० ७ O—चिंवा० C—चिंचा० ८ O—कर्कडी० B—कर्कटि० ९ O—उद्धृतं० B—उदस्तिद्वर्त्तते । C—उदस्वि० cf: अमरकोश, 1813—तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बुनिर्मलम् । १० cf: अमर० १३९८—आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः । फाण्टम् is a विकार of milk without दधियोग. cf. अमर०, २२१३, अनायासकृतं फाण्टम् etc. ११-१४ C omits. १५ B—सिंह्यः सन्ति O—सिंहाः व सिंह्यः सं० C—सिंह्यः सन्ति । १६ O omits. १७ B—व्याधाः सन्ति O omits. १८ B—बभ्रका० १९ O omits. २० B omits. २१ C—मार्ज्जार्य्यः सन्ति ।

"कुरुक्षेत्रमस्ति । सन्निहत्यातीर्थमस्ति । पृथूदकतीर्थमस्ति । इन्द्रप्रस्थपुरे निगमगोचरतीर्थमस्ति । मथुराक्षेत्रमस्ति । गोकुलमस्ति । गोवर्द्धनमस्ति । वृन्दावनमस्ति । पुष्करतीर्थमस्ति । नर्मदातीर्थमस्ति । अमरकण्टकक्षेत्रमस्ति । तत्र ॐकारेश्वरो वर्त्तते । चर्मण्वती वर्त्तते । तापीनदी वर्त्तते । अवन्तिकाक्षेत्रं वर्त्तते । महाकालेश्वरो वर्त्तते । नर्मदासङ्गमोऽस्ति । गुप्तप्रयागो वर्त्तते । सरस्वतीतीरे प्रभासक्षेत्रं वर्त्तते । गोमत्यस्ति । पञ्चद्वारकाः वर्त्तन्ते । [1]सिन्धुसङ्गमो वर्त्तते । हिङ्गुलादेवीक्षेत्रं वर्त्तते । सिन्धुनदो वर्त्तते । चन्द्रभागा वर्त्तते । काश्मीरसोमेश्वरो वर्त्तते । सन्ध्यावर्द्धनी वर्त्तते । व्यासगङ्गा वर्त्तते । वसिष्ठाश्रमो वर्त्तते । [2]मणिमहेशपर्वतोऽस्ति । त्रिलोकनाथक्षेत्रमस्ति । सरोवरतीर्थमस्ति । तप्तमणिकर्णिकाऽस्ति[3] । नगरकोटक्षेत्रमस्ति । ज्वालामुखीक्षेत्रमस्ति । इरावती नदी वर्त्तते । शरावती नदी वर्त्तते । [4]पुष्यभद्रायमुनासङ्गमोऽस्ति । यमुनानदी वर्त्तते । [5]गङ्गोत्तरा वर्त्तते । मन्दाकिनीतीरे केदारक्षेत्रमस्ति । अलकनन्दातीरे बदरिकाश्रमोऽस्ति मन्दाकिनी-अलकनन्दासङ्गमे [6]रुद्रप्रयागोऽस्ति । धवलगङ्गा-अलकनन्दासङ्गमे स्कन्दप्रयागोऽस्ति । भागीरथी-अलकनन्दा-सङ्गमे [7]देवप्रयागोऽस्ति । हरिद्वारक्षेत्रमस्ति । [8]कनकलाक्षेत्रमस्ति । [9]अलकनन्दाक्षेत्रमस्ति । [10]कुशावर्त्तक्षेत्रमस्ति । घटमुक्तेश्वरक्षेत्रमस्ति । हस्तिनापुरक्षेत्रमस्ति [11]सम्भलाग्रामोऽस्ति । सूकरक्षेत्रमस्ति । [12]नैमिषारण्यमस्ति । उत्तरगोकर्णमस्ति । सरयूनद्यस्ति । अयोध्याक्षेत्रमस्ति । नन्दिग्रामक्षेत्रमस्ति । गङ्गायमुनासङ्गमे वटप्रयागोऽस्ति । काशीक्षेत्रमस्ति । तत्र[13] विश्वेश्वरोऽस्ति । गयातीर्थमस्ति । तत्र गदाधरोऽस्ति ।[14] फल्गुनद्यस्ति । जगन्नाथक्षेत्रमस्ति । पुनः पुना नदी वर्त्तते । [15]श्रोणाभद्रानदो वर्त्तते । च्यवनाश्रमो वर्त्तते । राजगृहवनं वर्त्तते । वैद्यनाथक्षेत्रं[16] वर्त्तते । गङ्गासागरसंङ्गमतीर्थं[17] तिष्ठति । गण्डकी नदी वर्त्तते । चक्रतीर्थमस्ति । [18]मुक्तिक्षेत्रमस्ति । नेपाले नीलकण्ठतीर्थमस्ति । कामरूपे कामाख्यादेवी[19] वर्त्तते । अन्यान्यपि बहूनि तीर्थानि सन्ति ।"

"वाजपेयिनः भवतां देशे रजस्वलापक्वौदनः भुज्यते किल सत्यं वा [न] ।"

"स्वामिनः, न भुज्यते समीचीनैः ।"

"तर्हि असमीचीनैर्भुज्यते वा [न] ।"

"धर्कटैः अग्रमानिकैः[20] हलवाहकैश्च रजस्वलापक्वौदनः भुज्यते ।"

"तैः सह सम्बन्धो वर्त्तते वा न । सत्यं वदतु यदि मिथ्या वदथ भवतां परलोको नश्यति ।"

---

१ O omits सिन्धुसङ्गमो......सिन्धुनदो वर्त्तते । २ O मनिमहेश० B and C—मनमहेश. I have emended this to मणिमहेश० ३ O omits. ४ B and C—पुष्प (?) भद्रा० ५ O—गंगोतरी० ६ O—इंद्रप्रयागो० ७ B—देवयागो० ८ O omits. १० B omits कुशावर्त्त.....हस्तिनापुरक्षेत्रमस्ति । ११ O—संभलग्रामो० C—सभला० B—संभला० १२ C—निमिषा० १३ O omits तत्र. १४ B omits. O—गयातीर्थमत्रगदाधरोऽस्ति । १५ O—शोणभद्रा० B and C—श्रोणभद्रा० १६ O—वैजनाथ० १७ O—गंगासागरतीर्थं० १८ O omits मुक्ति......नीलकंठतीर्थमस्ति । १९ O—कामाक्षादेवी० २० B—अप्रमाणिकैः C—अप्रामाणिकैः. Since this does not refer to any caste or tribe, it is possible that the author meant मानिकs or माणिकs. The Maṇis or Māṇis are an ancient tribe, the Māṇiharas of Uttara Pradesh may be descendants of these Māṇis. See Shah, U. P., *Geographical and Ethnic Data In the Kāśyapa Saṁhitā*, Journal of the Oriental Institute, Vol. VII, No. 4.

"स्वामिनः, कस्मिन्देशे एवं चेत्, दुराचाराः न सन्ति। सर्वत्र दुराचाराः सन्त्येव। तथा हि—

दक्षिणदेशे कलौ मातुलकन्यावरणं[१] दुराचारः। दाक्षिणात्येषु वर्षचतुष्टयात्प्राक् कन्यायाः विवाहो दुराचारः। आन्ध्रदेशे हलवाहनं दुराचारः। [२]कर्णाटकदेशे स्नानं विना भोजनं दुराचारः। महाराष्ट्रदेशे उच्छिष्टभक्षणं[३] ज्येष्ठं परित्यज्य कनिष्ठस्य विवाहकरणं क्वचित्सौकर्यवशाच्च दुराचारः। द्रविडकेरलदेशयोः सर्वेषां कुचप्रदर्शनं दुराचारः। [४]केरलदेशे उपरिसुरतं दुराचारः। कोङ्कणे वृक्षारोहणं दुराचारः। गुर्जरदेशे[५] चर्मोदकपानं तृतीयदिने रजस्वलास्नानं दुराचारः। उत्तरदेशे कलौ मांसभक्षणं[६] दुराचारः। [७]पर्वतदेशे क्वचित्कलौ देवरेण सुतोत्पत्तिः दुराचारः। उत्तरदेशे क्वचित्तु शुष्कमांसभक्षणं अत्यन्तदुराचारः। [८]मैथिल-गौडदेशे सदातैललेपनं दुराचारः। गौडदेशे वेदत्यागो दुराचारः। कान्यकुब्जदेशे [९]पण्यस्थघृतपक्वभक्षणं विवाहादौ भोजनसमये परस्पर्शनं[१०] च दुराचारः। उत्कले मुखसुरतं दुराचारः। गौड-[११]द्राविड-केरल-उत्कल-मैथिलेषु पक्वकदलतण्डुलौदनभोजनं दुराचारः। सर्वेषां देशे[१२] पथिताम्बूलभक्षणं दुराचारः।"

"अतिसमीचीनं जातम्। अतः परं मया मठे गन्तव्यम्[१३]। अनुष्ठानकालो जातः।"

"गम्यतां श्रीमद्भिः।[१४] भिक्षाऽर्थं कदा आगन्तव्यं भवद्भिः।"

"मया न आगन्तव्यम्। किमिति चेत्, भवतां गृहे बहुसम्मर्दो जायते। अतीव कालो गच्छति। वृथा मम[१५]।"

"[१६]अद्य कथमागतं श्रीमद्भिः।"

"अनाध्याय इति कृत्वाऽऽगतोऽस्मि।"

"न-कारस्य दीर्घः कथं स्वामिनः।"

"अरे वाजपेयिन् तव कर्णौ न स्तः। बधिरोऽसि।"

"अपराधो जातः स्वामिनः क्षन्तव्यः[१७]। भवद्भिः यत्र गन्तव्यं तत्र सम्मर्दो भविष्यत्येव।"

"मया कुत्राऽपि न गम्यते।"

"तर्हि भिक्षा क्व कर्तव्या।"

"मया माधूकरं क्रियते।"

"उ-कारस्य दीर्घः केन।"

"न ज्ञायते वा।"

---

१ O—परिन(ण)यनं० २ O—कार्णाट० B—कर्णाटके० ३ O—भोजनं दु० ४ In C केरल etc. and कोङ्कणे० after the reference to कान्यकुब्जदेश. ५ B—गुर्ज्जरदेशे. ६ C omits. ७ C omits. O—क्वचित्कालो ८ C omits मैथिल.......वेदत्यागो दुराचारः। ९ B—पण्यघृत० १० B—भोजनसमये परस्पर्शनं O—भा(भो)जनसमये परस्परदर्शनं C—भोजनसमीपे परस्पर्शनं च. ११ C—द्रविड० १२ O—देशानां. १३ गम्यते। १४ B and C—भवद्भिः. १५ C—omits मम. १६ O omits from here upto शाल्यन्नं परिविष्य, loc. cit. १७ B and O—क्षन्तव्यम्.

" न ज्ञायते स्वामिनः । अन्येषामपि दृश्यते इति एवं चेत् भिक्षाऽधुना माधूकरीत्यादि प्रयोग-विरोधः स्यात् ।

" भवतु नाम प्रयोगविरोधः । ऋषिप्रयोगो वा कविप्रयोगो वा विरुध्यते तदा दोषः । "

" स्वामिभिः काव्यानि न पठितानि । "

" काव्यालापांश्च वर्जयेदिति वचनान्न पठ्यन्ते । "

" हे संन्यासिनः अस्य श्लोकस्य कोऽर्थः । "

" कस्य श्लोकस्याऽर्थः पृच्छ्यते त्वया ।

" रामं सीतां लक्ष्मणं जीविकार्थे विक्रीणीते यो नरस्तं च धिग्धिक् ।

अस्मिन्पद्ये योऽपशब्दं (ब्दान्) न वेत्ति व्यर्थप्रज्ञं पठितं (पण्डितं) तं च धिग्धिक् । "

" न ज्ञायते वा अयं श्लोकः प्रौढमनोरमायां वर्त्तते[1] । "

" तर्हि, एतस्य वक्तव्यः —

सुधे सुधे [2]वारिवधात्सुराणां सुकारणे लाघवतश्च रामः[3] ।

विशेषणे द्वे च इहाद्य कर्तुः [4]वदेदधीतीसह कैय्यटीये ॥

" अयं श्लोकः शब्दकौस्तुभे वर्तते, न ज्ञायते वा । "

" तर्हि, एतेषां मध्ये अपशब्दः निष्कासनीयः । "

" केषाम् । "

[5]राधाकृष्णं रुक्मिणीं जीविकार्थे सङ्गृह्णीते यो नरस्तं च धिग्धिक् ।

अस्मिन्पद्ये योऽपशब्दं न वेत्ति [6]व्यर्थप्रज्ञं पठितं (पण्डितं) तं च धिग्धिक् ॥ १ ॥

गीतं नृत्यं मालिकां जीविकार्थे धत्ते पुण्ड्रं यो नरस्तं च धिग्धिक् ।

अस्मिन्पद्ये योऽपशब्दं न वेत्ति व्यर्थप्रज्ञं पठितं (पण्डितं) तं च धिग्धिक् ॥ २ ॥

गङ्गां काशीं भैरवं विश्वनाथं नो जानीते यो नरस्तं च धिग्धिक् ।

अस्मिन्पद्ये योऽपशब्दं..॥ ३ ॥

वेदं शास्त्रं भारतं जीविकार्थे ज्ञात्वाऽधीते यो नरस्तं च धिग्धिक् ।

अस्मिन्पद्ये..॥ ४ ॥

" अरे वाजपेयिनः, ममाऽपि एतादृशाः कूटश्लोकाः सहस्रशः आयान्ति । तेषामर्थः कर्तुं शक्यते वा [न] भवता । "

" वक्तव्याः स्वामिनः । "

" किं प्रयोजनमस्माकं कलहेन । गन्तव्यम् । (तिष्ठति ।) दूरे स्थीयते मया । "

" कुत्र स्थीयते भवद्भिः । "

---

१ Manoramā on Pāṇini V. 3. 99 जीविकार्थे चापण्ये । २ B—वधात्सु० ३ O—०मुकारणे लाघवतः खरामः । ४ C—वदं दधीति. ५ O and B—राधाकृष्णं रुक्मिणीजीविकार्थे । C—धाराकृष्णं रुक्मिणीं० ६ B—व्यर्थप्रजां पठितं त(तं) च धिग्धिक् । १ । O—वृथा प्राज्ञ पंडितं....

" तिलाभाण्डेश्वरे स्थीयते मया ।"

" ल-काराकारस्य दीर्घः केन ।"

" अवैय्याकरणसङ्गतिवशाद्दीर्घः आगतः मुखात् । अपराधो जातः तर्हि ।"

" गम्यतां श्रीमद्भिः ।"

मठे आगत्य गुरूणां वन्दनं कृत्वा स्वामिनः ' अनुष्ठानं कृत्वा आगम्यते ' इत्युक्त्वा गङ्गायां गत्वा यथाविध्यनुष्ठानं कृत्वा मठे आगत्य गुरूणां निकटे गरुडासनेनोपविष्टवान् शिष्यः ।

गुरवः ऊचुः—" हे वामनाश्रम, अद्य किं किं भुक्तम् ।"

शिष्य उवाच —" अद्य मया यथा भुक्तं तथा कदाऽपि न भुक्तं स्वामिनः । तथा हि —

पङ्क्तौ सहस्रब्राह्मणाः[1] उपविष्टाः । सहस्राणामप्येकरूपेण पक्षपातं विना परिवेषणं कृतम् । विशालयुक्तदीर्घतराणि रम्भापत्राणि प्रत्येकं दत्त्वा पत्रपुटानि च दत्त्वा लवणशाकानि पर्यवेविषुः[2] ।

" कानि कानि लवणशाकानि पर्यवेविषुः सुवासिन्यः ।"

" आम्रशलाटुः । तिन्तिणीशलाटुः । कवकशलाटुः[3] । निम्बूशलाटुः । जम्बीरशलाटुः । नारङ्गीशलाटुः । बिल्वशलाटुः । आमलकीशलाटुः । कर्कटीशलाटुः । [4]औदुम्बरशलाटुः । शिवाशलाटुः । करीरलवणशाक (कं) आर्द्रकादीन्येतानि पर्यवेविषुः ।

एतत्परिवेषणानन्तरं शलाटुशाकान्पर्यवेविषुः ।

" के के शलाटुशाकाः पर्यवेविषुः ।"

" [5]वृन्ताकशलाटुः । कलिङ्गशलाटुः । कारवेल्लशलाटुः । कूष्माण्डशलाटुः । अलाबूशलाटुः । कदलीशलाटुः । शिम्बीशलाटुः । घृतकोशातकीशलाटुः[6] । [7]पनसशलाटुः । शिग्रुशलाटुः । पटोलीशलाटुः । बिम्बिकाशलाटुः । उर्वारुकशलाटुः । [8]तिन्दिसशलाटुः । राजमाषशलाटुः । [9]कर्कारी- शलाटुः । राजदन्तफलशलाटुः । गोरक्षकर्कटीशलाटुः । [10]सुखावासशलाटुः । [11]कुलकशलाटुः । कर्कोटकीशलाटुः । [12]राजाबुशलाटुः । बार्हतशलाटुः । बार्हतशलाटुः । [13]कठिल्लकशलाटुः । कर्कारूशलाटुः । चित्राशलाटुः । श्रेयसीशलाटुः । एतानि शलाटुशाकानि परिविष्य अन्यान्कन्दकान्पर्यवेविषुः ।"

" के के कन्दशाकाः ।"

" सूरणकन्दः । [14]आलुककन्दः । मूलककन्दः । रक्तमूलककन्दः । रक्तालुककन्दः । पिण्डककन्दः । अर्वामूलकन्दः[15] । पोथिकाकन्दः ।

---

१ N—सहस्रं ब्राह्मणाः, २ N—पर्यवेवेषिषुः O—पर्यवेविषु. ३ N—कतकशलाटुः । ४ N. adds मर्कटीशलाटुः । ५ N and B—वार्त्ताक० ६ C adds कोशातकीशलाटुः । ७ B omits पनस०......बिम्बिकाशलाटुः । ८ B—तिंदिल्य० N—तिन्दिशलाटुः । ९ N and C—कर्कटी० O—गोरक्षकर्कटी० १० B—सुखावस. ११ N and B—कूलक० C—कूलेक० १२ B—कर्कोटकीशलाबुशलाटुः । Apparently B omits, through scribal error, after कर्कोटकीशला, the syllables टुः राजा. N—राजालाबु०. १३ B—कठिल्लका० O—कटिल्लक० १४ B—आलक० १५ O—omits. N—अर्वा०

एतान्कन्दशाकान्परिविष्य पत्रशाकानि पर्यवेविषुः ।

" कानि कानि पत्रशाकानि । "

" शाकिनीशाकम् । वास्तुशाकम् । उपोदकाशाकम् । चक्रवर्तशाकम् । मूलकशाकम् । आलुकशाकम् । अगस्त्यशाकम् । शिग्रुशाकम् । सोमवल्लीशाकम् । [१]काण्डीरशाकम् । [२]कुसुम्भशाकम् । [३]कुरण्टकशाकम् । मिश्रेयाभवशाकम् । [४]समष्ठिलाशाकम् । [५]दद्रुघ्नशाकम् । वृद्धदारुशाकम् । श्रीहस्तिनीशाकम् । हिलसाशाकम् । तण्डुलीयकशाकम् । कदलीस्तम्भशाकम् । कदलीपुष्पशाकम् । अगस्त्यपुष्पशाकम् । घृतकुमारीपुष्पशाकम्[६] । एतानि शाकानि परिविष्य घृतपाचितशलाटुवानान्[७] पर्यवेविषुः ।

" के के घृतपाचितशलाटुवानाः । "

" कारवेल्लवानः । [८]भण्टाकीवानः । कठिल्लकवानम् । [९]निष्पाववानम् । राजमाषवानम् । कण्टकारिवानम् । बृहतीवानम् । सिम्बीवानम् । वन्ध्यावानम् । एतानि घृतपाचितशलाटुवानापि[नपि or न्यपि] परिविष्य कृसरान्नानि पर्यवेविषुः । "

" कानि कानि [१०]कृसरान्नानि । "

" दध्यन्नम् । [११]माषपर्पटपिष्टान्नम् । अम्लान्नम् । घृतान्नम् । सिद्धार्थपिष्टान्नम् । तिलपिष्टान्नम् । माषपिष्टान्नम् । एतान्यन्नानि परिविष्य रम्भाग्रपत्रमध्यप्रदेशे शाल्यन्नं परिविष्य [१२]सूपान्पर्यवेविषुः ।

आढकीसूपः । मुद्गसूपः ।[१३] माषसूपः । राजमाषसूपः । चणकसूपः । कुलत्थसूपः । निष्पावसूपः । मसूरसूपः ।[१४] सूपपरिवेषणानन्तरं पायसान्नानि पर्यवेविषुः । "

" कानि कानि पायसान्नानि पर्यवेविषुः । "

" गोधूमविकारपायसान्नानि नानाप्रकाराणि । तण्डुलपायसान्नम् । प्रियङ्गुपायसान्नम् ।

---

१ O—कदीर० २ C omits. ३ N O and B—कुरटका० ४ O—समष्ठीला०

५ N and C—दर्द्रुघ्न० B—दद्रु(?)घ्न० O—omits.

६ O N and C add शिग्रुपुष्पशाकम् । Since शिग्रुशाकम् is already noted above this is omitted from the text above. B omits. O omits अगस्त्य and घृतकुमारीपुष्प०

७ C—०वामान्. For वान cf. Anekārtha-Tilaka of Mahīpa, II. 296, p. 32; वानं शुष्कफले क्षामे प्रोते गन्धे कटे गतौ ।

८ B—भटाक० O omits. C—भंटाक० N—भण्टाक०

९ C—निष्पावानं. O and B—निष्पातवानं. Cf. Nāmamālikā of Bhoja, line 545, (Deccan College, ed., 1955) p. 35—अलसान्द्रे राजमाषो निष्पावः श्वेतशिम्बिका ।

१० कृसर (acc. to Monier Williams' Dictionary)—a dish consisting of sesamum and grain; a mixture of rice and peas with a few spices.

११ B—माषपर्य एतान्यन्नानि परिविष्य ।

१२ O—Omits upto शाल्यन्नं परिविष्य from अद्य कथमागतं श्रीमद्भिः on p. 20 above.

१३ B—आढकी०...मुद्गसूपः । माषसूपः । राजमाषसूपः ।

१४ O omits from माषसूपः......मसूरसूपः ।

एतद्दानानन्तरं [१]घृतपाचितपर्पटिकाद्वयं प्रत्येकं दत्त्वा नानाविधान्शाकिनीरसान्दत्त्वा क्वथिकान्पर्यवेविषुः ।

“ कान्कान्क्वथिकान्पर्यवेविषुः[२] । ”

“ तक्रक्वथिका । आमलकीक्वथिका । [३]तिन्तिणीक्वथिका । दाडिमरसक्वथिका । मरिचसारादि सर्वाः क्वथिकाः परिविष्याऽनन्तरं माहिषं दधि परिविष्य[४] घृतपाचितपक्वान्नानि बहुप्रकाराणि पर्यवेविषुः[५] । ”

“ कानि कानि भक्ष्याणि पर्यवेविषुः । ”

“ माषवटकाः । मुद्गवटकाः । चणकवटकाः । मण्डकाः लड्डुकाः । शष्कुल्यः[६] । मोदकाः । तिललड्डुकाः । अपूपाः । पूपाः ।[७] पिष्टकाः । अतिरसाः ।[८]

एतत्परिवेषणाऽनन्तरं सद्योघृतं दुग्धं च पर्यवेविषुः ।

एतान्पदार्थान्पुनः पुनः पर्यवेविषन्[९] सुवासिन्यः । ”

“ अरे वामनाश्रम यद्दत्तं तत्सर्वं भुक्तं वा न भुक्तम् । ”

“ न भुक्तं मया स्वामिनः । मम यद्वस्तु भक्षणयोग्यं तदेव मया गृहीतं स्वामिनः । ”

[१०]कृता **वरदभट्टेन गीर्वाणपदमञ्जरी** ।
गणेशप्रीतये चैव वैदिकप्रीतये भवेत् ॥

॥ इति श्रीगीर्वाणपदमञ्जरी समाप्ता[११] ॥ शुभमस्तु ॥ ६ ॥

---

१ O—पर्यढिकाद्वयं......नानाविधान्नशाकरसान्दत्वा क्वथिका पर्यावेषिषु ।

२ O—पर्यवेविषु.

३ O—तिंतिडी० B—तिंत्रिणी० C—तिंत्रिणी०

४ C—पर्यवेवेष्य B—पर्यवेविष्य O—पर्यवेष्य । N पर्यवेविष्य.

५ B—पर्यवेवेषिषुः O—षर्यवेषिषु C—पर्यवेवेषिषुः.

६ B—शष्कुल्याः । मोदकाः । The reading शष्कुल्याः मोदकाः is equally good. It would mean sweet-balls prepared from baked cakes, just as मण्डकाः लड्डुकाः taken together would mean (sweet) balls of मण्ड of milk, rice etc.

७ O—omits.

८ Is it an older or Sanskritised name of अनारसाः ? In गीर्वाणवाङ्मञ्जरी we have a variant reading अतिरसान् for अनारिसान् or अनारसान्.

९ C—पर्यवेवेष्विषन B—पर्यवेवेषिवुन् O—पर्यवेषिषु.

१० O—कृता वर्दभट्टेन गीर्वाणपदमजरी कृतं ॥ श्रीविश्वेश्वराय नमः ॥

११ C—०समाप्तमिति ॥ शुभमस्तु ॥ श्रीकृष्णाय नमः ॥ श्रीरामचन्द्राय नमः ॥ ६ ॥
N—इति श्रीगीर्वाणपदमंजरी समाप्तम् ॥ सं १७३६ वर्षे चैत्र शुक्लात् षष्ठी ६ भृगु दिने लिखितमधुना ॥

॥ गीर्वाणवाङ्मञ्जरी ॥

श्रीगणेशाय नमः ।।[१]

नत्वा श्रीपति[२]पादपद्मयुगलं[३] विघ्नेश्वरं शारदां[४]
तद्वच्छ्रीगुरुपादपङ्कजयुगं ध्यात्वा ततः सादरम् ।

काशीस्थेन हि धुण्डिराज-कविना गीर्वाणवाङ्मञ्जरी
बालानां सुखबोधनाय रचिता संशोधनीया बुधैः ॥ १ ॥

केवलं वैदिकानां तु शब्दाब्धिमतिदुस्तरम् ।
स्वल्पायासेन सन्तर्तुं निर्मिता तरणिर्दृढा[५] ॥ २ ॥

शब्दलिङ्गविभक्त्यादि कर्तृकर्मक्रियाऽव्ययम् ।
नानापदार्थसंज्ञाऽर्थमनया बुध्यतेऽखिलम् ॥ ३ ॥

प्रातरारभ्य विदुषा कर्त्तव्यं कर्म यद्भवेत् ।
उक्तमासायपर्यन्तमस्ति यत्क्रमशोऽखिलम् ॥ ४ ॥

उक्तिप्रत्युक्तिभिः किञ्चित्स्त्रीपुंभ्यां वा विनोदि(द)तः ।
गृहकृत्यविधौ सर्वं वक्ष्यमाणमुदीर्यते ॥ ५ ॥

तदाऽऽह—कश्चिद्ब्राह्मणः उषःकाले शयनादुत्थाय प्रातस्स्तोत्रादिकं पठन्सन्स्त्रियं प्रत्यूचिवान् ।[६]

" अयि, मया दीर्घशङ्कार्थं गम्यते । शीघ्रमुदकं[७]देहि । करपादविशोधनार्थं मृत्तिका देया । "

इत्युक्ते सति तया झटित्युत्थाय जलपूरितपात्रं दत्तम् । करपादविशोधनार्थं मृत्तिका दत्ता । तदा[८] तेन शौचादिकं विधाय पीठोपरि स्थित्वा करपादौ प्रक्षाल्य दन्तकाष्ठेन दन्तान्विशोध्य पुनः स्त्रियमुवाच ।

---

१ B—श्रीमते भगवन्निम्बार्काय नमः । As the author seems to follow Madhva, it is not likely that he would pay homage to Nimbārka in the beginning. C—श्रीगणेशाय नमः ॥ अथ भाषामंजरि प्रारंभः ॥

२ O—omits पति, which would be metrically faulty.

३ B & C—०ममलं

४ O—विश्वेश्वरं शांतिदं

५ O—तरणी दृढा

६ C—प्रत्युक्तवान्

७ O—०दंडकं

८ O—omits तदा.

"अयि, शृणोषि। अद्य मया मणिकर्णिकास्नानार्थं गम्यते। शीघ्रं[1] स्नानसामग्रीं देहि। अग्रोदकपात्रं देहि। अर्घ्यपात्रं रुद्राक्षमालिकां विभूतिवटिकां देहि[2]। देवार्चनपेटिकां तिलनारिकेलं चन्दनं च ददस्व[3]। एतानि[4] शीघ्रमानय[5]।"

पुनस्तयोच्यते—"त्वरा किमर्थं क्रियते। अत्र[6] दीपकस्तु[7] नास्ति। अन्धकारगृहे[8] किमपि न दृश्यते। त्वरितं चेत्कथं भविष्यति।"

इत्युक्ते सति सः क्रोधेनाऽऽह—"भो रण्डे[9], किं वदसि। मम स्नानस्य कालातिक्रमो जायते। सन्ध्यासमयो गच्छति।"

"तूर्णं त्वरा क्रियते तत्किम्[10]।"

इत्युक्त्वा[11] तया सर्वं दत्तम्। पुनस्स्त्रियमुवाच—

"अयि, अद्य[12] महत्पर्व तिष्ठति। अद्य कश्चिद्ब्राह्मणो निमन्त्रणीयः। कश्चिद्यती(यतिः)वा आकारणीयः[13]। तव जामाता आयास्यति तव भ्राताऽपि आगच्छतु। तव भ्रातुरपत्यान्यपि आयान्तु[14]। तव[15] स्नुषायाः आकारणार्थं द्राग्दुहितरं सम्प्रेषय।"

इत्युक्ते सति पुनः साऽऽह—"तर्हि भवतामपि भ्रातुरपत्यमाकारणीयं खलु।"

"आः तस्याऽर्भकस्य किम्। तन्निमित्तं किं[16] विशिष्टं कर्तव्यं भविष्यति। सर्वेषां मध्ये सोऽप्येकः आयास्यति।"

पुनः सा[17] बभाषे—"बिन्दुबिन्दुनैव पुष्करिणी पूर्यते। तस्याऽर्भकस्य गणना कथं न भवतु। तर्हि अद्य भक्ष्यं किं विधेयम्।"

"यन्मनसि आयास्यति तत्कुरु।"

"तर्हि उपसामग्री ह्यानेया[18]।"

"तर्हि पुत्रमाकारय।"

"स तु निद्रितो वर्तते।"

"राण्डेयं[19] शीघ्रमुत्थापय।"

"स तु भवत्प्रदेशे एव तिष्ठति। भवद्भिरेव बोधितव्यः।

पुनः स रोषेणाऽऽह—"अरे बलीवर्द, शीघ्रमुत्तिष्ठ। प्रभातं जातम्[20]। एतावत्कालपर्यन्तं किं निद्रितोऽसि। आलस्यं जहीहि।"

---

१ C & O—तूर्णं. २ O—omits देहि. C—विभूतिबद्धिकां देवतार्चनपेटिकां. ३ O—तिलनालिके चन्दनं ददस्व. ४ O—एतान्. C—एतानि वस्तूनि शीघ्रमानेहि. ५ O—आनेहि. ६ B—यत्र. ७ C & B—दीपः. ८ O—अन्धकारे गृहे. ९ B—omits. १० B—तूष्णीं त्वरा क्रियते किम्. C हे कान्त तूष्णीं त्वरा किं क्रियते। इत्युक्त्वा तदा० ११ O and B—इत्युक्तेन. १२ O and B omit अद्य. १३ B—आकरणीयः. १४ O—omits तव.....आयान्तु। १५ B and C add—तव श्वशुर(रा) पत्यान्यपि आयान्तु। १६ O—omits किम्. १७ O reads स. १८ O and B—उपसामग्रीमानय। १९ O reads रांडे. B—रंडेयं. २० B & C—प्रभातस्तु जातः.

इत्युक्ते सति स तूर्णमुत्थितः करौ मेलयित्वा विनयात्प्रणम्य पितुरग्रे स्थितवान्[१] । ततः[२] पिताऽऽह—

"अरे, अद्य गृहे महत्प्रयोजनं तिष्ठति । त्वमापणे गच्छ । उपसामग्रीमानय[३] ।"

"तर्हि **मुद्रिकाः** **ढबुकाः**[४] देयाः ।"

पुनः पिताऽऽह—"अरे अन्तःपुरे गच्छ । तत्र दारुमञ्जूषा तिष्ठति । तन्मध्ये [५]जातरूपसम्पुटोऽस्ति । तदन्तः **सुवर्णमुद्रिका रजतमुद्रिका** बद्धाः[६] सन्ति । तासु रजतमुद्रिकाद्वयं गृहाण । पुनस्तत्सर्वं तादृगेव स्थापनीयम् । पश्चात्तन्मुद्रिकाद्वयं गृहीत्वा **बृहदापणे** गच्छ । **चतुस्तम्भापणे** गत्वा **मूषक-माधवजी-हट्टे** ते विभज्य **ढबुकान्**कृत्वा यद्यदपेक्ष्यते तत्तद्गृहाण ।"

"भो पितः किं किं गृह्णामि तद्वदध्वम् ।"

ततः पिताऽऽह—"अरे, आदौ **वणिजापणे**गत्वा तत्र घृतं सार्द्धशेरकद्वयं[७] ग्राह्यम् । तदर्द्धमुद्रिकाया भविष्यति[८] । सिता[९] शर्करा ग्राह्या । पूर्णार्थं[१०] चणकदालिर्ग्राह्या[११] । हिङ्गु ग्राह्यम्[१२] । जीरका ग्राह्या[१३] । हरिद्राचूर्णं ग्राह्यम् । क्रमुकाः ग्राह्याः । एला-[१४]लवङ्ग-जातीफलानि जातिपत्रं च ग्राह्यम् । खदिरं मा विस्मर । कर्पूरो ग्राह्यः । कस्तूरिका[१५] ग्राह्या । केसरं गोरोचनं ग्राह्यम् । उशीरो ग्राह्यः तस्याऽपरं नाम सुगन्धवाळा[१६] इत्युदीरयन्ति जनाः । दशाङ्गं ग्राह्यम्[१७] । तत्र इयत्[१८] गृहीत्वा तदग्रे गच्छ । तत्र पटशोधितगोधूमचूर्णं प्रतिज्ञया[१९] गृहीत्वा शुद्धमाषपिष्टं ग्राह्यम् । शुद्धचण-कदालिपिष्टं[२०] ग्राह्यम् । तण्डुलपिष्टं च ग्राह्यम् । ततोऽप्यग्रे **शाकापणे**[२१] गत्वा यान्यान्शाकान्प्राप्नोषि तान्तान्गृहाण ।"

"कान्कान्गृह्णामीति तद्ब्रूत[२२] ।"

"अरे आदौ सूरणो[२३] ग्राह्यः । शुभ्रकन्दो ग्राह्यः । रक्तकन्दो ग्राह्यः । कर्कटिका ग्राह्या[२४] । बुद्बुदका[२५] ग्राह्यास्तर्हि सर्षपान् आनयस्व[२६] । कूष्माण्डफलं ग्राह्यम् । पीतकूष्माण्डं च ग्राह्यम् । परोवराणि वृन्ताकानि तुण्डीफलानि[२७] गृह्णीष्व । पटोलफलानि[२८] कारवेल्लानि [२९]पनशफलानि गृहाण । तदग्रे **अन्नपूर्णान्तिके**[३०]

---

१ O—तिष्ठवान्. २ B—तदा. ३ B and C—आनेहि. ४ B—मुद्रिकाः ठवूका. C—ठब्बुकाः. ५ B—सम्पुष्टो. ६ B—बाह्य: C—बहूस्तिष्ठन्ति. ७ O—सार्द्धद्वयशेरं B—सार्द्धशेरकद्वयं. ८ Thus ghee was priced at eight silver coins per maund. The seer may be of 40 or 80 tolas, probably the latter. ९ O—तस्याः सिता. १० पूर्ण = पूरण of modern पूरणपोळी, a very favourite dish of the Mahārāshṭrians. C—पूरणार्थं. ११ O—च एकदा विग्राह्या. १२ C—हिङ्गु ग्राह्यः. १३ C—जीरकामरीचिका ग्राह्याः । १४ B—एलाः लवङ्गा १५ B—कस्तूरी. १६ B and C—नाम सुगंधवाला. १७ दशाङ्ग refers to दशाङ्ग-धूप. १८ B—इदं. १९ B—प्रतिज्ञाया. २० B—दालिका० २१ B—शाकाशापणे. २२ O—तद्ब्रूत. B—तद्ब्रूहि. २३ B—शूरणो. २४ B—कर्कटिका ग्राह्याः. C—कर्कटि० २५ B—बुदबुदका. O and C—बुद्बुकाः. २६ C omits सर्षपा० २७ तुम्बीफलानि० २८ C adds कोशांतकी ग्राह्या । २९ O—फनसानि. ३० अन्नपूर्णा—This is a reference to the famous shrine of अन्नपूर्णा at Banaras. Near the shrine, plaintains etc. were sold. अन्नपूर्णा does not seem to be a market name like शाकापण, वणिजापण etc. noted in the text.

गत्वा तत्राऽपक्ककदलीफलानि पक्ककदलीफलानि[१] च गृहाण। कदलीगर्भकन्दं कदलीकुसुमानि च गृहाण[२]। तत्र नागवल्लीदलानि मागधीयानि पक्वानि गृहाण[३]। ततोऽपि इत आगत्य **काल-भैरवापणे**[४] गत्वा तत्र बहवः पत्रशाका वर्तन्ते तेषु प्रथमतः मेथीपत्रं[५] ग्राह्यम्। तण्डुलपत्राणि [६]उपोदकीपत्राणि चक्रमर्दकपत्राणि बृहतीफलानि गृहाण। [७]वनकारवेल्लानि मिलिष्यन्ति चेद्गृह्णीष्व। [८]रक्तकन्दपत्राणि शुभ्रकन्दपत्राणि प्राप्स्यसे तर्हि गृहाण। अरे तिन्तिणीं[९] मा विस्मर। तथैव शृङ्गवेरं गृहाण दीर्घरम्भापत्राणि आनय। अतोऽप्यधिकं यद्दृश्यते तद्गृहाण।"

"भो पितः एतेषां पदार्थानां स्मरणं कथं भविष्यति।"

[इति] तेन उक्ते सति पुनः क्रोधेन जनिताऽऽह[१०]—

"अरे मूर्ख त्वं केवलं गर्दभप्रायोऽसि। तवाष्टादशवर्षाणि कुतो गतानि को वेद। हे मूढशिरोमणे तर्हि एकस्मिन्**कागदे**[११] सर्वमालिख तमालोक्य[१२] सर्वं गृह्णीष्व।" इत्युक्त्वा पुनर्जगाद—

"आः अद्य मम भूरि विलम्बो जातः।[१३] अतीव कालक्षेपो[१४] जातः। अहह ममाऽदृष्टस्य सर्वेऽपि[१५] मूर्खतराः मिलिताः।

यथेऽयं दुर्भगा रण्डा तथाऽयं मन्दधीः सुतः।
अनयोरसङ्गदोषेण कुतः श्रेयो भवेन्मम ॥ १ ॥

भवतु अतः परं स्थातुं न शक्यते।" इत्युदीर्य गङ्गातीरेणैव **मणिकर्णिकां** गतः। तत्र गत्वा **महाप्रयोगमु**च्चार्य यथाविधि स्नानं विधाय सन्ध्यामनुष्ठितवान्। तदनन्तरं **ब्रह्मयज्ञं** [१६]**निवापश्च** (पं च) विधाय [१७]भगवन्तं यथोत्पादितद्रव्यैः सम्पूज्य पुनरुत्थितस्तत्रैकमयाचित-वृत्तिनं[१८] ब्राह्मणं निमन्त्र्य [१९]पुनर्घट्टमारुह्य संन्यासिनां मठे गतः। तत्र बहवो दण्डिनः स्थिताः। तेषु एको वृद्धस्तुन्दिलो यतिः स्थितः[२०]। तमालोक्य तदन्तिके गतः। दण्डवत्प्रणम्य वाक्यमुवाच—

"स्वामिनः, श्रीमतां दर्शनेन अहमतीव कृतार्थो जातः।"

इत्युक्ते सति स्वामिभिः 'नारायण नारायणे'त्युक्तम्। तदाऽयं पुनरूचिवान्—

"स्वामिनः श्रीमतामत्रैव स्थितिर्वा।" पुनः स्वामिना 'नारायण' इत्युक्तम्[२१]।

"अतिसमीचीनो मठस्तिष्ठति। अतिसम्यक्स्थलं वर्तते। स्वामिनः[२२] किञ्चिद्विज्ञप्तुकामोऽस्मि, अङ्गीकृतं चेद्वक्ष्यामि।"

"किं तद्ब्रूहि[२३]।"

---

१ O omits पक्व...दलानि. २ B. गृह्णीष्व. ३ O omits तत्र नाग....गृहाण। ४ Market near the shrine of Kāla-Bhairava. ५ O—मेथिकापत्रं. ६ B—उपौदकी. C—कूपोदकी० ७ O—वनकारवेल्लि. ८ O—रक्तकंठ० ९ O—तंत्रिणी. १० जनयता. ११ O—पत्रे. १२ सर्वमालिखितं तदालोक्य. B—सर्वं समालिखितमालोक्य. C—सर्वं समालिख्य तमालोक्य। १३ O—मम विलम्बो जात भूरि. १४ O—०क्षयो. १५ O—च for अपि. C—अहह मम दिष्टस्य सर्वेऽपि० १६ B omits निवापश्च. १७ B—भगवत. १८ B—मयाचितवृत्ति. १९ B—घटमा० २० O—तेषु एको वृद्धो यतिस्थितमालोक्य तदन्तिको गतः। B—एषु एकः वृद्धः स्तुंदिलो यती स्थितः etc. २१ O and B read only "नारायण", but C preserves the whole line as above. २२ अति सम्यगलंकृतो वर्तते तिष्ठति. २३ O—तत् ब्रूत.

" श्रीमद्भिरद्य मम गृहे भिक्षार्थमागन्तव्यं चे[१]त्कृतकृत्यो भवामि। स्वामिनः ममाद्य जन्मनः साफल्यं जातम्।"

ततः परं यतिवर्यैरुच्यते[२]—

" अरे, तव का वा ज्ञातिः।"

" स्वामिनः अहं महाराष्ट्रो[३]ऽस्मि।"

" एवं किल तर्हि महाराष्ट्राणां गृहे अस्मदादीनां भिक्षा तु अतीव शस्ता[४]। ततस्त्वं श्रोतियोऽसि किम्।

" स्वामिनः श्रोत्रियोऽस्मि[५]।"

" तर्हि सम्यग्जातम्। कुतः—
याचयेच्छ्रोत्रियस्यान्नं तदभावे जलं पिबेत्। तदद्य घटितम्। अरे, परं तु त्वं गौडवद्भाससे रे[६]। किमिदम्।"

" सत्यम्, स्वामिनः, मम जन्म गौडदेश एव जातम्[७]। मम पितुरपि जन्म तत्रैव जातम्। आवाभ्यां तत्रैवाधीतम्।"

" एवं वा तर्हि तव पितुर्नामधेयं किम्।"

" स्वामिनः मम पितुर्नाम **अदब्धव्रतप्रमतिर्वसिष्ठभट्टाचार्य** इति प्रसिद्धम्।"[८]

" तव नाम।"

" मम नाम **झिलिमिलिझाङ्कार-शौचालङ्कार-अलर्षियुध्-मखजकृत्-पुरन्दर-भट्टाचार्य**[९] इत्युदीरयन्ति जनाः।"

" सत्यं तत्रत्यानामेतादृशमेव दीर्घतरं नाम भवति। त्वमपि तत्रत्यः किल।"

" स्वामिनः।"

इत्युक्त्वा पुनरूचिवान्[१०]–" स्वामिनस्तर्हि उत्थानं कर्तव्यम्। समयस्तु जातः[११]। अतः परं दण्डकमण्डल्वादिकं गृहीत्वा मया सहैव श्रीमद्भिरागन्तव्यम्।"

---

१ O—तत्
२ B—यतिनोच्यते
३ B—महाराष्ट्रो०
४ C—अति प्रशस्ता
५ B and O omit this as well as किम् from the preceding line
६ B—गौडवभदाससे रे
७ O—omits एव
८ B—०नाम अदग्धवृत प्रमति वीसिष्ट भट्टाचार्य इति etc.
O—०नाम अदब्धव्रत प्रमति वसिष्ठ भट्ट इति....
९ B—मम नाम स्वामिनः झिलिमिलि झांकार शौचलंकारयुज्मखकृत्पुरंदर भट्टाचार्य......
O—झिलिमिति झांकार शौचेलंकार अलर्षियुध्मखजकृत् पुरंदर भट्टाचार्य......
C—झिलिमिति...शौचेलंकारअलर्षियुध्मखजकृत्......।
१० B—०वान्सः
११ O & B omit स्वामिनस्तर्हि ......जातः।

इत्युक्ते सति स्वामिभिरुच्यते—

"अरे तव गृहं कियद्दूरं[१] तिष्ठति । कस्मिन्घट्टेऽस्ति ।

"स्वामिनः मम गृहं समीपे तिष्ठति । दुग्धविनायकसमीपे वर्त्तते । गङ्गादास इति प्रसिद्धो महाजनस्तस्यायतनसमीपे ममाऽपि वेश्म तिष्ठति । "

"तर्हि भवतु । "

इत्युक्त्वा[२] स्वामिनः उत्थिताः । दण्डकमण्डल्वादिकं गृहीतम् । तदा स्वामिनः शिष्यं प्रत्यूचुः[३]—

"अरे मेघाश्रम त्वया अद्य अत्रैव स्थातव्यम् । मठं [४]त्यक्त्वा कुत्राऽपि न गन्तव्यम् । "

"तर्हि स्वामिनः भिक्षार्थं कुत्रचिद् गन्तव्यं खलु । "

"अरे किं वदसि । अद्य कुत्राऽपि मा गच्छ[५] । तत्र पृथुकास्तिष्ठन्ति[६] । तक्रं वर्त्तते । काष्ठभाजने लवणं विद्यते[७] । तद् गृहीत्वा तदेव भक्षणीयम् । कुतः भ्राम्यसि[८] । "

इत्युक्त्वा स्वामिभिः प्रयातम् । तदा यजमान आह—

"स्वामिनः भवन्तः अग्रे भवन्तु । अहं पश्चाद्भवामि । "

इत्याकर्ण्य यतिभिरुक्तम्[९]—

"न हि न हि[१०] त्वमग्रतो भव । अहं पश्चाद्भवामि । अतीवसम्मर्दस्तिष्ठति । त्वया सर्वेषां निराकरणं कर्त्तव्यं नो चेत्स्पर्शो भविष्यति । "

इत्युक्ते सति तेनाङ्गीकृतं तथैव कृतवान् । [११]पुनस्तावुभौ गृहमागतौ । अन्तर्गृहमागत्य पुत्रमाकारयामास—

"अरे प्रभाकर शीघ्रमेहि । स्वामिनां पादप्रक्षालनार्थमुदकं देहि । "

इत्युक्ते सति तेन शीघ्रमुदकमानीतम् । तदा यजमानः स्वहस्तेन स्वामिपादौ प्रक्षाल्य तदम्भसा शिरसि अभ्युक्ष्यान्तःपुरे गतः । ततः स्वामिनः [१२]बृहत्पीठोपरि सावकाशं तस्थुः । तदा ये भोजनार्थ-

---

१ O—कियदि(द)तिदूरे. B—कियदूरं.

२ O—इत्युत्का. B—इत्युक्ता. Both O and B often misspel उक्त्वा and write उक्ता. Such variants are not noted.

३ O—प्रत्यूत्वः.

४ B and O—त्यत्का.

५ O—अरे वदसि अत्र कुत्रापि गच्छत.

६ B—पृथुकस्तिष्ठति.

७ B and C omits काष्ठ....विद्यते.

८ B and C—कुतः श्राम्यसि. O—कुतः भ्राम्यसि.

९ O—उच्यते.

१० O—omits one नहि.

११ O—omits after नो चेत्, स्पर्शो.....पुनः.

१२ B—बृहतिठो० C—ब्रह्मपी०

मागतः स्थितास्तैस्सर्वैः स्नात्वाऽन्तरागतम् । ततः यजमानो भगवतः षोडशोपचारपूजन कृत्वा नैवेद्यं [१]निवेद्य वैश्वदेवं बलीहरणं चकार ततोऽन्तःपुरे गत्वा स्वामिनामधोदेशे सर्वान्यथास्थानं[२] सन्निवेश्य अमत्राणि ददौ । तेषां मध्ये यतीनां तु पत्रमतीव विपुलम् साग्रं दत्तवान् । द्रोण सप्तकं ददौ । अन्येषां दीर्घतराणि रम्भापत्राणि[३] पत्रपुटद्वयमदापयत्[४] । ततः यतिवर्यान्पञ्चोपचारैः सम्पूज्य, अन्यान्गन्धाक्षतादिभिरलङ्कृत्य[५] सर्वेषां चरणतीर्थमग्रहीत् । ततः स्त्रियं प्रत्युवाच —

" अयि, आदौ घृतेन सर्वेषां पत्राण्यभिघार्य शीघ्रं परिवेषय । "

इत्युक्ते सति सा [६]द्रागुत्थाय परिवेषयामास। आदौ लवणं परिवेषयित्वा पश्चाल्लवणशाकान्परिविविषे[७]। आम्रोपदंशं परिविविषे निम्बूफलानामुपदंशं शृङ्गवेरोपदंशं सूरणोपदंशं धात्रीफलानामुपदंशं बदरीफलानामुपदंशं [८]वृन्ताकस्योपदंशं[९] कर्बुदस्योपदंशं[१०] मूलकस्योपदंशं[११] कीचकाङ्कुराणामुपदंशमुर्वारुकोपदंशम्। बृहतीफलशलाटुः[१२] अलाबुशलाटुः[१३] कदलीकुसुमशलाटुः[१४] कदलीगर्भस्य शलाटुः[१५] । कारवेल्लस्य लवणशाकं शालफलानां लवणशाकं[१६] गर्जराणां लवणशाकं ततः परं नानाविधशाकान्परिविविषे । ततः शुद्धमाषवटकान्परिविविषे[१७] मेथीवटिकाः तिलवटिकाः[१८] कूष्माण्डवटिकाः[१९] अम्बष्ठवटिकाः[२०] कूष्माण्डबीजवटिकाः परिवेषितवती । ततः पर्पटकान्पर्यवेषयत् ।[२१] दधिवटकाः पर्यवेषयत् । द्राक्षवटकाः[२२] पर्यवेषयत् । [२३]शुद्धचणकदालिनिर्मितदधिसार्षिपोपस्कृतलाडुवटिकान्पर्यवेषयत् । मेथीकूटं परिविविषे । ततः परमतिसूक्ष्मशालितण्डुलानामोदनं सर्वेषां मध्ये परिविविषे[२४] । तदुपरि शुद्धाढकीसूपं[२५] परिविविषे । ततो नानाविधानि भक्ष्याणि परिविविषे । तेषां विशेषमाह आदौ [२६]पूर्णगर्भास्ततो मण्डकान्लड्डुकान्परिविविषे[२७] । घृतपाचितसुपक्वमाषवटकाः[२८] परिविविषे । अनारिसान् (परिविविषे ।[२९]) अपामालून्[३०] परिविविषे । शष्कुलीदधिका० (काः परिविविषे)[३१] ।

पूरिकाः परिविविषे। वटपूरिकाः [३२]फेनिकाश्च परिविविषे। चीरवटिकाः[३३] परिविविषे। [३४]घृतापूपान्पर्यवेषयत्। जिह्वालेह्याः[३५] परिविविषे पर्पटिकाः परिविविषे। ततः[३६] शर्करोपस्कृतपूरिकाः परिविविषे[३७]।

१ O—omits निवेद्य. २ B and C—सर्वान्यथाययथास्थानं. O—सर्वान्याधाय यथास्थानं. ३ B—दीर्घभावपत्राणि. ४ O—०मादापयत. ५ O—आगतान्गन्धाक्षतादिभि० ६ O—सा सद्रागु० ७ O—Everywhere O and C give परिवेशिवे for परिविविषे of B. O gives परिवेषयामास and परिवेषयित्वा for परिवेशयामास and परिवेशयित्वा of B. Though परिविश् is occasionally used, the original धातु was परिविष्. C omits आम्रोपदंशं परिविविषे. ८ Omitted by O. ९ O—०पदंशाः. १० Omitted by B. ११ O and C—०पदंशाः. I have brought together all the उपदंशs which are not in order in both the texts. १२ C—बृहतीफलानां शलाटुः B—बृहतीफलस्य लाडुः । १३ B—अलाम्बुशलाडुः. १४ B—कदलीकुसुमलाडुः. १५ B—०लाडुः । १६ C and B omit. १७ O—०भास. B—०मास. १८ B omits. १९ B—कूष्मांडलावटिका. २० B—अम्बष्ट. C and O—अंगुष्ठ. २१ B—परिवेविशे. २२ C—दधिवटिकाः and द्राक्षवटिकाः । २३ O and C—सर्षपयोप० २४ B omits मेथि-कूटं......मध्ये परिविविषे. २५ C—°रूपं B—स्तूपं. २६ C, O, B—पूरण० २७ C, B—मंडुकान्परिविविषे लड्डुकान्परिविविषे. २८ C and B—घृतपाचितशुष्कमासवटिकान्० २९ B, C—अतिरसान् परिवेशय. ३० B—अपामूलन्० ३१ O—omits. C—शकुली परि० ३२ O, C—फेणिकाश्च. ३३ C, B—चिरवटिका. ३४ C—घृतपूरितपूपान्. ३५ B—लेह्यः C—०लेह्यान्. ३६ C, B—omit ततः. ३७ O—omits परिविविषे.

[१]मोदकान्तिलल्लडुकान्मुद्गलड्डुकान्घृतभर्जितगोधूमचूर्णलड्डुकान्पर्यवेषयत् । [२]पेटकान्पर्यवेषयत् । अत ऊर्ध्वं नानाविधानि भक्ष्याणि परिविविषे ।

ततः पायसान्नानि परिविविषे । गोधूमविकारजानि[३] सप्तविधानि पायसान्नानि परिविविषे । केवलमाष-[४]तण्डुलपाचितपायसान्नं प्रियङ्गुपायसान्नं च परिविविषे । तदुपरि [५]शुद्धसिताशर्करां परिवेषयामास । ततो गोघृतेनैव सर्वेषां द्रोणाः पूरिताः । तदनन्तरं व्यञ्जनोपस्कृतक्काथीं परिविविषे[६] । तन्निकटे मरीचचूर्णं[७] परिविविषे ।

स्वामिनां द्रोणसप्तके किं किं परिविष्टं तदाह—

दधि-दुग्ध-घृत-क्काथि-तक्र-पूरणसारकैः ॥
षड् द्रोणाः पूरिताः पूर्णं[८] यतीन्द्राणामथाऽऽदरात् ॥ २ ॥

एकं (को) जलपानार्थं स्थापितः । ततो यजमानो ब्रह्मार्पणेनान्नं सङ्कल्पितवान् । ततः प्राक्[९] स्वामिनां हस्तोदकं ददौ । ततस्सर्वैरापोशनं[१०] गृहीतम् । यजमानोऽपि तेषां पङ्क्तौ स्वयमपि भुक्तवान् । तदा स्वामिनः बहून्पदार्थान्निरीक्ष्य परं व्याकुलतया[११] बुभुजुः । ततः यजमानः श्रीपादान्प्रार्थयामास ।

"स्वामिनः अद्य परमतिकालो जातः । सावकाशतया भोक्तव्यम् ।

यद्रोचते तद्ग्राह्यं यन्न रोचते तत्त्याज्यम्[१२] ।"

एवमेव सर्वेषां प्रार्थनां चकार । ततस्सर्वैर्यथारुचि भुक्त्वा स्वामिनं पुरस्कृत्योत्थितम् । ततस्स्वामिनां हस्तप्रक्षालनार्थमुदकमादापयत्[१३] । करशोधनार्थं शर्करा दत्ता । दन्तशोधनार्थं वेणुशलाकामदापयत्[१४] । करोद्वर्तनार्थं चन्दनं दत्तम् । ततस्स्वामिनस्स्वच्छतया[१५] हस्तपादप्रक्षालनं कृत्वाऽगस्त्यादीनां स्मरणं चक्रुः । ततो यजमानः यतिवर्यान्पुरस्कृत्य, अन्यान्सर्वानादाय सौधान्तरे गतवान् । तत्र बृहत्पीठोपरि स्वामिनः सावकाशं तस्थुः । अन्ये विचित्रास्तरणोपरि स्थिताः । तदा यजमानेन स्वामिनां मुखशुद्ध्यर्थं [१६]मुष्टिपरिमितलवङ्गा दत्ताः । अन्येषां ताम्बूलदक्षिणादिकं दत्त्वा विसर्जयामास । ततस्ते सर्वे यजमानायाशिषं प्रयुज्य स्वं स्वं निकेतनं जग्मुः । ततो यजमानः श्रीपादानां[१७] नमस्कारार्थं स्त्रीपुत्रादीनाकारयामास । ततो[१८] यजमानस्य पत्नी भर्तुर्वाक्यं श्रुत्वा सर्वं कार्यं परित्यज्य स्नुषां दुहितरौ च समादाय तत्र तूर्णं समागता । तत्राऽऽगत्य विनयात्प्रणनाम[१९] । तदा स्वामिभिः सादरं दृष्ट्वा 'नारायण नारायणे'-त्युक्तम् । पश्चात्साऽन्तःपुरे गता । ततस्स्वामिन ऊचुः ।

"अरे, इयं तव गृहिणी किम् ।"

"स्वामिनः ।"

---

१ C—मुद्गलल्डुकान्. २ C—adds before पेटकान्—शिश्राट्टुलड्डुकान् परि० ३ O—विकारानि. ४ B—केवलमिषतंदुलपचित. ५ B—omits सिता. ६ C—परिवेषय० (परिवेषयामास). ७ B—मरीची. ८ C, B—तूर्णं. ९ B—द्राक्. १० C—अपोशनं. ११ C—आकुलतया. १२ B—तस्यज्यताम्. १३ B—०मदात् १४ O—omits करशोधनार्थं......वेणुशलाकामदापयत् । १५ B—०कृत्स्नया० १६ O—०मुष्टिपूरित० १७ O & B—श्रीपदानां. १८ C—तदा. १९ O—प्रणेमुः.

" परं साध्वी भवति । यत्राऽऽकृतिस्तत्र गुणा वसन्तीति श्रुतं स्थितं तदद्य दृष्टम्[१] । त्वं परं भाग्यवानसि । कुतः

भोज्यं भोजनशक्तिश्च रतिशक्तिर्वराङ्गना[२] ।
विभवो[३] दानशक्तिश्च नाल्पस्य तपसः फलम् ॥ १ ॥

इत्युक्तं वर्तते । ते सर्वे गुणास्त्वयि दृष्टाः[४] । त्वत्तोऽन्यः कश्चिद्भाग्यवान्न[५] । "

" स्वामिनः सर्वं भवतां प्रसादात्खलु । "

" अरे, तव कति अपत्यानि तिष्ठन्ति । "

" स्वामिनः द्वौ पुत्रौ स्तः द्वे दुहितरौ च[६] ।

" इमौ द्वावपि तव कुमारौ वा । "

" स्वामिनः । "[७]

" एतयोर्नाम किम् । "

" स्वामिनः ज्येष्ठस्य दिवाकर इति नाम । अपरस्य प्रभाकरशर्मा इत्यभिधानम् । "[८]

" एताभ्यां किञ्चित्पठ्यते । "

" स्वामिनः किञ्चिद्व्याकरणं पठ्यते । काव्यानि पठ्यन्ते । कोशादिकमधीतं वर्त्तते । "

" एवं वा तर्हि सम्यक् । [९]एनयोर्विवाहो जातोऽस्ति [न] वा । "

" स्वामिनः ज्येष्ठस्य लग्नं जातं कनीयसः[१०] न । "

" एवं तर्हि तव स्नुषा न दृश्यते । "

" स्वामिनः अधुना प्रणामार्थमागता स्थिता खलु सैव । "

" एवं[११] वा तर्हि [१२]अतिशोभना वर्त्तते । परं लावण्यवती वर्त्तते । तव पुत्रस्य योग्या भवति । "

" स्वामिनः । "

" एतस्याः प्रथमरजोत्सवो जातो वर्त्तते[न]वा । "

" जातः स्वामिनः । "

" कति दिनानि जातानि । "

" स्वामिनः मासद्वयं जातम् । "

" एवं वा तर्हि सम्यक् । परंतु सर्वेषामाज्ञया वर्त्तते खलु । "

" एतावत्पर्यन्तं तिष्ठति । "

" अरे, त्वं परं भाग्यवानसि । "

" स्वामिनः सर्वं भवतां कृपया । "

" अपरा षोडशवार्षिकी दृष्टा, सा का । "

" स्वामिनः मम ज्येष्ठदुहिता । "

---

१ O—घटितम् २ C & B—वरा स्त्रियः ३ B—विभवे ४ B—अनापि दृष्टाः । C—त्वयि दृष्टाः O—त्वयि दृश्यन्ते ५ B—omits न ६ B & C—वत्तते. ७ C—omits. ८ अपरस्य प्रभाकर इत्यभिधानं. C—ज्येष्टस्य दिवाकर इति शर्म अपरस्य प्रभाकर इत्यभिधानं. O—omits इत्यभिधानं. ९ O—एतयो०. १० O—कनिष्टस्य. ११ B and C—omit एवम्. १२ B—अतितरा.

" अरे, एतस्याः परिणेता स एव वा ।"

" [स्वामिनः ।]"

" आः इदं किं कृतम् । स कनीयान्दृश्यते [१]ह्रस्वोऽपि वर्त्तते । अनया योग्यो न भवति । तव एतादृशी लावण्यवती कन्या । स रारण्डेयः ईदृक् दुर्भगः[२] । इदमनुचितं कृतम् ।"

" स्वामिनः, तस्याः ब्रह्मसूत्रेण कृतम् । मया किं कर्तव्यम् । परं तु वयसा अधिकस्तिष्ठति परं तु ह्रस्वो वर्त्तते ।"

" भवतु, अपरस्याः विवाहो जातो वा न[३] ।"

" न हि स्वामिनः ।"

" तर्हि तस्या एवं न[४] कर्त्तव्यम् । हो द्रष्टव्यम् ।"

" स्वामिनः तस्याः प्रारब्धगत्या यद्भविष्यति तद्भवतु ।"

" अरे, तव कनिष्ठकुमारस्य लग्नं कदा भविष्यति ।"

" स्वामिनः मासचतुष्टयादूर्ध्वं भविष्यति ।"

" तर्हि कुत्रचिद्योजितं वर्त्तते ।"

" हो स्वामिनः[५] ब्रह्मघट्टे एकस्त्र्यम्बकभट्टनामा[६] ब्राह्मणस्तिष्ठति । तस्य दुहित्रा साकं घटितार्थः । तथेति तेन[७] दास्यामीत्युक्तं वर्त्तते । परंतु ऋणानुबन्धो बलवत्तरः । अपरं च—

भ्रमन्वनान्ते नवमञ्जरीषु न षट्पदो [गन्धफलीं हि] जिघ्रति ।
सा किं न रम्या स च किं न रन्ता बलीयसी केवलमीश्वरेच्छा ॥"[८]

" एवं वा तर्हि अहं तं जानामि । तस्य गृहे मया बहुवारं भिक्षार्थं गतं वर्त्तते । तस्य भार्या अतीव[९] साध्वी वर्त्तते । अतिशोभना वर्त्तते । तया मयि भूरिस्नेहो विधीयते[१०] । तस्या हस्ते[११] पाकस्तु अतिरुचिरो भवति । परं कुशला वर्त्तते । तर्हि सा तव योग्या भवति[१२] ।"

" स्वामिनः उपहास्यते किम्[१३] ।"

" न हि रे, तव सम्बन्धयोग्या भवति । कुलीना वर्त्तते । तामहं जानामीति कृत्वा उच्यते ।"

" द्रष्टव्यं स्वामिनः, यदा भविष्यति तदा खलु ।"

" न हि न हि त्वं सुकृती असि । ईश्वरस्य कृपया तव वाञ्छितं शीघ्रं भविष्यति ।"

" तथास्तु ।"

---

१ B—तरुणोऽपि. C—रुग्णोऽपि. २ B—ईंद्रियदुर्भगः. ३ O—omits न. ४ C—omits न. ५ O—omits हो. ६ C—ब्रह्मघट्टे भास्कर नामा. ७ C—घटिताथैस्त्व यातितेन. B—घटितार्थः त्वदाचितेन. ८ O and B omit from अपरं च......to केवलमीश्वरेच्छा. ९ O—अतिसाध्वी. C—अतीव अतीव साध्वी. १० O—मयि बहुस्नेहो वर्त्तते. ११ C—omits हस्ते. १२ B—भवसि. O and C—भवति. १३ B—स्वामिनः उपहससि. C—स्वामिनः उपहस्यते किम् ।

पुनः स्वामिनः ऊचुः —

"अरे परं तु मया तव [1]भार्यया समा काऽपि योषिन्न दृष्टा । एतस्याः गुणान्किं वर्णयामि । कुतः, मुहूर्तद्वयाऽभ्यन्तरं यया एतादृशः समीचीनो पाको विहितः । एते पदार्थाः रचिताः । पुनः सर्वान्परिविष्य ब्राह्मणान्यथेच्छं भोजयित्वा द्राक्[2] स्वयमपि भुक्त्वा त्वयाऽऽकारिते[3] सति अत्राऽपि आगता । एतावानुद्योगः । अन्यासां स्त्रीणामायास्यति [न][4] वा । एते गुणा अभ्यास-सिद्धा न भवन्ति । कुतः —

दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता[5] ।
अभ्यासेन न लभ्यन्ते चत्वारः सहजा गुणाः ॥

एते सर्वे गुणास्तव योषिति वर्त्तन्ते । त्वयाऽतिभाग्यवशादियं लब्धा । तव परं सुखदात्री भवतु । अरे, शृणु, तव योषित्सगर्भा वर्त्तते किम् ।"

"सत्यं स्वामिनः । मासचतुष्टयं जातं वर्त्तते ।"

"एवं तर्हि मया आदावेव ज्ञातम् ।"

"सत्यम् ।"

"तर्हि सम्यग्जातम् । अष्टपुत्रा भवतु ।"

"तथाऽस्तु ।"

पुनः ऊचुः स्वामिनः —

"अरे, तव पिता वाराणसीं त्यक्त्वा गौडदेशे बहुवर्षपर्यन्तं किमर्थं स्थितः ।"

"स्वामिनः विद्याभ्यासार्थं स्थितः[6] ।"

"तर्हि काश्यामध्ययनं न भवति किम्[7] ।"

"'न भवति' कुतः । भवति, परं तु तत्र तर्के अधीतम्[8] ।

"किमधीतम्[9] ।"

"स्वामिनः यथा पितृचरणैरभ्यासः कृतस्तावान्मया[10] कर्तुं न शक्यम् । तदर्धं किञ्चिन्मयाऽपि[11] अभ्यस्तम् ।"

"किं किमभ्यस्तं भवता ।"

"स्वामीनः मया आदौ **पञ्चप्रकरणान्यधीतानि**, ततश्चिन्तामणिरधीतः । पश्चाच्छिरोमणिरभ्यस्तः । तदनु **मथुरानाथी** अधीता । ततो **भावानन्दी**[12] पठिता । ततो **मिश्रान्ताऽपि ग्रन्था** दृष्टाः ।"

"अन्यत् किमधीतम् ।"

---

१ B—भार्यायाः. २ C—प्राक् O—ईदृक् स्वयमपि मुक्त्वा. ३ O—आकारिता. ४ O—आयास्यन्ति. B—॰स्त्रीणां त्रया (पा ?) अतीव. ५ C—उचितज्ञया. B—पावित्र्यं वितविज्ञतां. ६ B. omits this reply. ७ O—कुतः ८ O—तर्कमधीतं । ९ C—omits. १० C—तावत्. O omits from कृतः... ..अभ्यस्तम् । ११ C—omits अपि. १२ C and B—भवानन्दी.

"अष्टादशाऽपि कोशा दृष्टाः वर्त्तन्ते। भाष्यान्तं व्याकरणमधीतम्। मीमांसायामप्यध्ययनं वर्त्तते। वेदान्तेऽपि परिश्रमोऽस्ति। अष्टादशपुराणानि पठितानि[१] वर्त्तन्ते। छन्दोऽलङ्कारनाटकसाहित्यसहितानि काव्यानि अपि पठितानि वर्त्तन्ते। ज्योतिषेऽपि अभ्यासोऽस्ति। वैद्यकेऽपि परिश्रमो विहितः। सङ्गीतेऽपि भूरिपरिश्रमो[२] वर्त्तते। अतोऽप्यधिकं यत्किञ्चिद्वर्त्तते तत्र सर्वत्र मम[३] अभिनिवेशो वर्त्तते।"

स्वामिनः उचुः—"त्वया सर्वमधीतं वेदो नाधीतः किम्, शिव शिव।"

"स्वामिनः वेदं विना ब्राह्मणत्वं कुत्र। ब्राह्मणानामादौ वेदाध्यनं पश्चात्किमपि भवतु।"

"तर्हि [४]कान्वेदानधीतवानसि।"

"ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।
वेदा अधीताश्चत्वारः सषडङ्गपदक्रमाः॥"[५]

"एवं वा तर्हि सम्यक् न हि मया श्रूयते वङ्गदेशीया ब्राह्मणाः केवलं वेदबाह्या भवन्ति।"

"सत्यम्, स्वामिनः। तत्रस्था ब्राह्मणाः स्मृतिप्रामाण्येन[६] वर्त्तन्ते। न तु[७] वेदाध्ययनं कुर्वन्ति।"

"एवं वा भवतु। अन्यत्किञ्चिन्मया श्रुतं वर्त्तते। यत्तत्रत्याः ब्राह्मणा अपि[८] मत्स्याशनं कुर्वन्ति। तर्हि अयं तु[९] भूयान्दुराचारः क्रियते तैः। इदं सत्यं वा अलीकम्।"

"तत्तु सत्यं[१०] स्वामिनः।"

"एतादृशो दुराचारः कुत्र नास्ति[११]।"

"सर्वत्र एकैकः दुराचारस्तिष्ठति।"

"एतादृशः दुराचारः कुत्रचित् तिष्ठति किम्।"[१२]

"अहं दर्शयामि स्वामिनः। भवद्भिर्द्रष्टव्यम्—

आदौ दक्षिणदेशे कलौ मातुलकन्याप्रणयनं (परिणयनं) दुराचारः[१३]। वर्षचतुष्टयात्प्राक् कन्याया विवाहो[१४] दुराचारः। आन्ध्रदेशे[१५] हलचरणं[१६] दुराचारः। श्रीमतां कर्णाटकदेशे[१७] स्नानं विना भोजनं दुराचारः। ताम्रपात्रे गव्यादिनिक्षेपणं[१८] दुराचारः। द्रविडकेरलयोः सर्वासां कुचदर्शनं दुराचारः। पथि पर्युषितान्नभक्षणं दुराचारः। केरलदेशे उपरिसुरतं दुराचारः। कोङ्कणदेशे वृक्षारोहणं दुराचारः। गुर्जरदेशे चर्मोदकपानं[१९] तृतीयदिने रजस्वलास्नानं दुराचारः। उत्तरदेशे कलौ मांसभक्षणं दुराचारः। क्वचित् शुष्कमांसभक्षणं दुराचारः।

---

१ C—अष्टादशानि पुराणानि कथितानि. O—०कथितानि. B—अष्टानि काव्यानि पठितानि वर्त्तन्ते। २ B—सांगीतेपरि भूरि परिश्रमो० C—संगीतेपि परिश्रमोस्ति. ३ O—न मे ४ O omits कान्. ५ C—चत्वारो वेदा अधीता सषडंगपदक्रमाः। O—वेदाधीता.....पदविक्रमाः। ६ O—प्रमाणेन. ७ B. च. ८ O and C omit अपि. ९ O—omits तु. १० O—तत्सत्यं. C—न तु. ११ C—एतादृशाः दुराचाराः कुत्र नास्ति. B—०कुत्रापि नास्ति. १२ C—एतादृशः कुत्रचित् दुराचारस्तिष्ठंति किं। B. एतादृश कुत्र दुरस्तिष्ठति किं। O omits एतादृश.....तिष्ठति. १३ C—०कन्यावरणं इदमेव दुराचारः। O—omits कलौ. B—omits दुराचारः। १४ O—कन्याप्रणयनं. C—कन्याविवाहो. १५ B—अन्ध्रदेशे. १६ C—हलवहने. १७ C—कर्नाटक० O—कर्णाटक० B. कर्णाटके देशे. १८ B—गव्यादीनां निक्षे० १९ B—चर्मोदकपात्रं C. गुर्ज्जरदेशे चर्मोदकं. O—०चर्मोपानं.

[१]**पर्वतदेशे** कलौ देवरेण सुतोत्पत्तौ(त्तिः) दुराचारः। [२]**मैथिल-गौड-देशे** सदातैललेपनं[३] दुराचारः। **गौडदेशे** वेदत्यागो[४] दुराचारः। **कान्यकुब्जदेशे** पण्यस्थ[५]घृतपक्वभक्षणं दुराचारः। विवाहादौ भोजनसमये परस्परस्पर्शनं दुराचारः[६]। **उत्तरदेशे** परस्त्री [गमनम्] दुराचारः। **उत्कलदेशे** मुखसुरतं दुराचारः। **गौड-द्रविड-केरल-उत्कल-मैथिलेषु** [७]पक्व-कलमतण्डुलभक्षणं दुराचारः। **मगधे** वर्णसङ्करणं[८] दुराचारः। **चन्द्रावत्यां** दासीगमनं दुराचारः। **काश्मीरदेशीयाः** द्विजाः केवलयवनप्रायाः खलु तेषां दुराचाराणां गणनैव नास्ति। सर्वेषां स्ववृत्तिं परित्यज्य अन्यवृत्त्यवलम्बनं कन्याद्यविक्रयाणां विक्रयकरणं पथि ताम्बूलभक्षणमित्यादि दुराचारविशेषः स्वभावत एव भवति[९]। स्वामिनः, **महाराष्ट्रं** विना सर्वासु [१०] जातिषु कश्चित्कश्चिद्दुराचारस्तिष्ठत्येव। महाराष्ट्रेष्वपि ये **माध्वाः** वर्तन्ते तेषां दुराचारस्य लेशोऽपि[११] न दृश्यते।"

"इदं तु त्वया सत्यमुक्तं मयाप्यनुभूतं वर्तते।"

"स्वामिनः, नो चेदनृतमुच्यते किम्। श्रीमतां कृपया वयं सर्वं जानीमः सत्यम्।"

"अरे, तव **गौडदेशे** कानि कानि **तीर्थानि** वर्त्तन्ते।"

"स्वामिनः **गङ्गासागरतीर्थं** वर्त्तते, **कुमारिकाक्षेत्रं**[१२] वर्त्तते[१३]। **ब्रह्मपुत्रस्तिष्ठति**। **कामरूपेश्वर-स्तिष्ठति**। **कामाक्षी-देवी**[१४] वर्त्तते। अतोऽप्यधिकानि बहूनि तीर्थानि [१५]बहून्यायतनानि वर्त्तन्ते।"

"एवम्, अन्यत्किं विशिष्टवस्तु जायते।"

"स्वामिनः, **पट्टवस्त्राणि** बहुविचित्राणि[१६] बहुमौल्यानि तत्र भवन्ति। **क्षीरोदकसंज्ञानि दुकूलानि** अतिसमीचीनानि जायन्ते[१७]। अन्यान्यपि **रेश्मसम्भवानि चीराणि** बहुविचित्राणि भवन्ति[१८]। स्वामिनः पृथिव्यां रेश्मोत्पत्तिस्तत्रैव जायते। अन्यानि[१९] **तूलजातानि वस्त्राणि अतिसूक्ष्माणि** भवन्ति। तथा सर्वाणि **धान्यानि** तत्र भवन्ति। व्रीहयो भवन्ति। गोधूमा भवन्ति। यवाः, चणकाः, आढक्यो,[२] माषाः, मुद्गाः, मसूराः, राजमाषाः, कुलित्थाः, लङ्काः,[२१] तिलाः, खल्वाः, प्रियङ्गवः, एणवः,[२२] नीवाराः, श्यामाकाः,[२३] मण्डवाः,[२४] सर्षपास्त्रिविधाः भवन्ति[२५]। पृथुको अतिसमीचीनो जायते[२६]। स कथं पृथुकः—

१ C—omits पर्वतदेशे....मिथलगौडदेशे...दुराचारः। and takes it after उत्कल etc. २ O & B—मिथिल० ३ B—सदातैलस्नानं O—०तैलभक्षणं लेपनं० ४ C—adds अपि ५ O—अपर्णस्थ घृतभक्षणं C—पण्यस्थघृतभक्षणं ६ B—omits उत्कलदेशे...दुराचारः। ७ C—°पक्वकेलमेतंदुल. O—०पक्वमलतंदुल० ८ C—मगधदेशे वर्णसंकरो ९ O—स्वयमेव भवति. १० O and C—ज्ञातिषु ११ C—लवलेशोऽपि १२ B—गङ्गासरस्वतीतीर्थं etc. O—omits गङ्गा...वर्त्तते then, कुमारिकादेवी वर्त्तते। १३ C—adds कुमारिका देवी वर्तते १४ B and C—कामाक्षादेवी० १५ O—omits बहून्यायतनानि... upto अन्यत् in the next line.s १६ C—omit बहुविचित्राणि १७ C—दुकूलानि भवन्ति। समीचीना जायन्ते। १८ C—रेश्मसंभवानि समीचीनानि बहुविचित्राणि भवन्ति। B—रेश्मसं[भ]वानि चीनानि बहुविचित्राणि भवन्ति। O—रेश्मसंभवानि चिराणि बहुविधानि संति। १९ O—अन्यत्र तूलजानि २० C—यवाः भवंति। चणकाः भवंति। आढक्यो द्विजातीनि भवंति। माषाः द्विजातीयाः भवंति। मुद्गाः मसूराः etc. २१ C—लकाः २२ C—ऐणवः २३ C—श्यामकाः O—श्यामकाः २४ B and C—मंडवः O—मडवाः २५ O and B—omit भवन्ति. २६ O—पृथुकाः अतिसमीचीना जायन्ते।

कीरतनूरुहपीतस्तरुणीकरकमलैरुपनीतः ।
पयसा शर्करया समुपेतः कर्षति कस्य जनस्य न चेतः ॥

[१]एतादृशाश्चिपिटिकास्तत्रैव भवन्ति । शर्करा अतिशोभना जायते, सिताऽपि भवति[२] । गुडोऽपि भवति ।

दुग्धं समीचीनं जायते, दधि भवति, क्षौद्रं भवति,[३] घृतमतिसमीचीनं भवति । तैलानि बहुविधानि भवन्ति, तिलतैलं, सर्षपतैलं, अतसीतैलं, एरण्डतैलं, कुसुम्भतैलं[४] च जायते । नानाविधानि सुगन्धि तैलानि भवन्ति । नानाविधानि सुगन्ध(न्धि) अर्काणि भवन्ति[५] ।

बहुविधा शाखा भवन्ति । बहुविधा वृक्षा भवन्ति । आम्रवृक्षा[६] भवन्ति, पनसवृक्षा वर्तन्ते, नारिकेलितरवः, क्रमुकवृक्षाः,[७] बहुविधाः कदलीतरवश्च सन्ति । बदरीवृक्षाः जम्बूवृक्षाः[८] दाडिमीवृक्षा वर्तन्ते । कदम्बवृक्षाः बकुलभूरुहाः सन्ति । पारिजाततरवः[९] नागचम्पकाः अनेकजातीया निम्बूतरवः सन्ति पिचुमन्दवृक्षाः । नारङ्गगुल्माः भूचम्पकगुल्माः वर्तन्ते । कनकचम्पकगुल्माः सन्ति[१०] । [११]सीताफलशाखिनः कपित्थवृक्षाः केतकीगुल्माः सन्ति । शमीवृक्षाः धातकीवृक्षाः[१२] तिन्तिणीतरवः करमर्दगुल्माः[१३] [१४]भूपनशगुल्मास्तिष्ठन्ति । देवदारुतरवस्तिष्ठन्ति । शुष्कागरुतरवः कृष्णागरुतरवः न्यग्रोधवृक्षाः[१५] सन्ति । अश्वत्थवृक्षाः वर्तन्ते[१६] । शाल्मलीतरवः काञ्चनवृक्षाः सन्ति । बिल्ववृक्षाः सन्ति । मधूकवृक्षाः वर्तन्ते[१७] । अशोकवृक्षाः सन्ति । औदुम्बरवृक्षाः वर्तन्ते । कर्मतरवः[१८] सन्ति । तमालतरवः तालवृक्षाः शालवृक्षाः शालफलवृक्षाः सरलतरवः पुन्नागवृक्षाः अर्जुनवृक्षास्तिष्ठन्ति । वनबदर्यः केतकवृक्षाः विद्यन्ते[१९] । धवखदिरशाखिनः कर्बूरवृक्षाः[२०] पलाशतरवः बिभीतकवृक्षाः भल्लातकवृक्षाः भूर्जवृक्षाः अभयवृक्षाः सन्ति । कीचका वर्तन्ते । वेतसाः सन्ति । करञ्जकवृक्षास्सन्ति । गुग्गुलवृक्षा भवन्ति । चन्दनतरवः कदम्बवृक्षास्सप्तच्छदाः सन्ति । चारवृक्षाः अगस्तिवृक्षाः[२१] अक्षतरवः[२२] सन्ति । वचनागतरवः वनस्पतयो बहुविधा भवन्ति । अपामार्गगुल्माः नागरङ्गगुल्माः[२३] सन्ति । नागकेसरं जायते । भृङ्गराजतृणं

---

१ B—एतादृशश्चपटक० २ B—omits शर्करा...भवति ३ C—दधिभवक्षौद्रो भवति. O—omits क्षौद्रं भवति...upto वृक्षा भवन्ति । ४ B—कुकुंभ० ५ O and B omit नानाविधानिसुगंध....अर्काणि भवन्ति । Is this a later interpolatoin ? ६ O omits from भवन्ति......पिचुमन्दवृक्षाः । It reads आम्रवृक्षाः जम्बुवृक्षाः नारंगगुल्माः etc. C omits भवन्ति only. ७ C—क्रमुकाः. ८ C—जंबूफलतरवः. ९ C—चंपकवृक्षाः त्रिविधाः संति । बहुविधाः नानातरवानि बहुतरवः संति पिचुमंदवृक्षाः संति । १० References to भूचम्पक and कनकचम्पकगुल्माः omitted in C. ११ B and C—शीताफल० १२ B and C—धात्रीवृक्षाः १३ B—कर्वंदगुल्माः C—करगुल्माः. १४ C—भूपलाश. O—भूपणश. १५ B adds here तमालतरवः but they figure after कर्मतरवः below in C and O. C adds here—चंदनवृक्षाः औदुंबरवृक्षाः रक्तचंदनतरवः, शुष्कागरुतरवः कृष्णागरुतरवः. Omitted in B and O but B and O give औदुंबरवृक्षाः below. I have omitted चंदनवृक्षाः and रक्तचंदनवृक्षाः from the text above. १६ B—सन्ति. १७ B omits शाल्मलीतरवः.....मधुकवृक्षाः वर्तन्ते. The order of the different trees is different in B, O and C. १८ B—चर्मतरवः. १९ C—बदरीवृक्षाः केतकवृक्षाः etc. B— वनबदर्यः तेंदुकवृक्षाः etc. २० B and C—बर्बुरवृक्षाः. २१ Omitted by O. २२ B—माक्षर(?)तरवः. C—प्रक्षतरवः. ३ O and C omit नागरंगगुल्माः.

जायते । बृहतीगुल्माः भवन्ति । अर्कधत्तूरगुल्माः[१] मुचुकुन्दगुल्माः[२] । बर्बरी-ब्राह्मी-मुण्डी-दूर्वा-तृणं भवति । अपराजिताऽस्ति । पुनर्नवा वर्तते । विजयागुल्मा भवन्ति । रुदन्तीवाचस्पतिर्विद्यते ।

अथ लताविशेषाः—माधवीलता, मालतीलता, आकाशवल्ली, [३]मरीचलता, पिप्पलीलता, गुडूची, नागदमनलता, गुञ्जालता वर्त्तन्ते । नागवल्लीलता[४] विद्यते । सेवन्तिकागुल्मा भवन्ति । वासन्तिका, कुन्दपुष्पाणि,[५] करवीरकुसुमानि, असनपुष्पाणि, पाटलीकुसुमानि, मन्दारपुष्पाणि, जातीकुसुमानि, मल्लिकापुष्पाणि विद्यन्ते । बन्धूकपुष्पाणि, सिन्दूरकुसुमानि, [६]माचीकुसुमानि तुलसीगुल्माः, मारुगुल्मानि[७] भवन्ति । इक्षवो भवन्ति । अपस्मारेक्षवो भवन्ति[८] । कुशाः विद्यन्ते । काशाः विद्यन्ते[९] । शरा विद्यन्ते । श्वेतदूर्वा विद्यन्ते । विष्णुक्रान्तं तृणमस्ति । अतोप्यधिका वनस्पतिविशेषा बहवस्तिष्ठन्ति ।

नद्यो बहवतिष्ठन्ति । पूर्वसमुद्रोऽस्ति । भागीरथी वर्त्तते । अन्यानि बहुविधानि सरांसि विद्यन्ते । पुष्करिण्यः[१०] सन्ति । तासु बहुविधानि सरोरुहाणि[११] भवन्ति । कुमुदानि बहुविधानि जायन्ते । तत्र बहुविधाः पक्षिजातयः सन्ति । नीलपतत्रिणः[१२] सन्ति । हंसा विद्यन्ते । बकाः[१३] विद्यन्ते । वायसा विद्यन्ते । पिकाः विद्यन्ते । मयूराः सन्ति । चातकाः सन्ति । चक्रवाकाः सन्ति । खञ्जनाः सन्ति । शुका विद्यन्ते सारिका विद्यन्ते । चकोराः सन्ति । जलकुक्कुटाः[१४] विद्यन्ते । कोयष्टयः सन्ति । दात्यूहाः सन्ति हरिताः सन्ति[१५] भृङ्गराजाः सन्ति कारण्डपक्षिणः[१६] सन्ति । गृध्राः सन्ति । चाषाः सन्ति । पिङ्गलाः सन्ति । पारावताः सन्ति[१७] । सारसाः सन्ति । उलूकाः विद्यन्ते । वागुरिण्यः सन्ति । टिट्टिभाः[१८] सन्ति ।

तथा बहुविधानि श्वापदानि विद्यन्ते—व्याघ्राः सन्ति, वनमहिषाः सन्ति, वृकाः सन्ति, जम्बूकाः सन्ति, वराहाः सन्ति, गोमायवः सन्ति, खड्गमृगाः सन्ति, [१९]चमर्यः सन्ति, भल्लूकाः सन्ति, मयूराः सन्ति,[२०] मर्कटाः सन्ति, [२१]श्वानः सन्ति । तथा ग्राम्यपशवः-गावः सन्ति, महिष्यः सन्ति, अजाः सन्ति, एडकाः सन्ति, मेषाः सन्ति, उष्ट्राः सन्ति, गजाः सन्ति, अश्वाः सन्ति । खेचराणि सन्ति । रासभाः सन्ति । मार्जाराः सन्ति । मूषका विद्यन्ते । नकुलाः सन्ति, सर्पाः सन्ति, भेकाः सन्ति । छुछुन्दर्यस्तिष्ठन्ति । शरठाः सन्ति । पल्याः[२२] सन्ति । वृश्चिका विद्यन्ते । मक्षिकाः सन्ति । मशकाः सन्ति । मत्कुणा[२३] विद्यन्ते । क्षुद्राः सन्ति । पतङ्गाः सन्ति । भ्रमराः सन्ति । पिपीलिकाः सन्ति । अतोऽप्यधिकाः बहुविधा जन्तवस्तिष्ठन्ति ।

---

१ O—omits नागकेसरं......अर्कधतूरगुल्माः. C—अर्कधत्तूरगुल्मानि द्विविधानि भवन्ति । २ C—मुचुकुंदतुलसी । B—मुचुकुंदः. ३ B and C—मारीचलताः. ४ O—गजवल्ली० ५ O and C—कन्दपुष्पाणि. ६ O—मारी० ७ C—दमनगुल्माः मरुगुल्माः भवन्ति । B omits. O—मारु० ८ O—omits. ९ B omits. १० O—पुष्करीरायः. ११ C—omits the word सरोरुहाणि, but adds after भवन्ति, इंदीवराणि जायन्ते । १२ O—नीरपतत्रिणः C—तीरपतत्रिणः. १३ C—कंका०. १४ C—जलकुर्कुटानि० B—जलकुक्कुरानि० १५ O—omits दात्यूहा....हरिताः सन्ति. १६ C—कारंजपक्षिणः १७ O—omits गृध्रा...चाषा...पिङ्गला...पारावताः सन्ति. १८ O and C—टिटिभाः १९ C—adds मृगाःसन्ति B—च मृगा (मृगाः) सन्ति. २० O & B omits. २१ B—omits. २२ C—पल्यः २३ O—मुरुर्कुटा. B—कुत्कुणा.

अथ जलजन्तवः ।—बहुविधा मत्स्याः सन्ति, शफर्यः सन्ति,[१] कूर्म्मा विद्यन्ते । नक्राः विद्यन्ते । जलसर्पाः सन्ति । जलवृश्चिकाः सन्ति । कर्कटा विद्यन्ते । जलौका विद्यन्ते । जलमूषका विद्यन्ते । एभ्योऽपि बहुविधाः जलजन्तवस्तिष्ठन्ति । नौविशेषाः बहवः सन्ति । [२]नौचारिणः बहुकुशलाः वर्त्तन्ते[३] । कैवर्त्तकाः बहवः सन्ति । नौव्यवसायिनः बहवो वर्त्तन्ते ।

बहुविधा जनाः वर्त्तन्ते—ब्राह्मणाः वर्त्तन्ते, क्षत्रियाः वर्त्तन्ते, वैश्याः सन्ति, शूद्राः वर्त्तन्ते । **गुर्जरा** वर्त्तन्ते । **आन्ध्रा**स्तिष्ठन्ति । **कर्णाटका** वर्त्तन्ते । **द्रविडा** वर्त्तन्ते । **महाराष्ट्रा**स्तिष्ठन्ति ।

चित्तपावनाः सन्ति । **काण्वाः**[४] सन्ति । **माध्यन्दिनाः** सन्ति । **जैनाः** सन्ति । **कान्यकुब्जाः** सन्ति । **सारस्वताः** सन्ति । **माथुरा** वर्त्तन्ते । **पाञ्चालाः**[५] वर्त्तन्ते । **मरुजाः** सन्ति । [६]**मागधीयाः** सन्ति । **मैथिलाः** सन्ति । **पार्वतीयाः** सन्ति । **त्रिहूतनाः** सन्ति । **गौडानां** देश एव तु । **उत्कलाः** वर्तन्ते । **काशीस्था** वर्तन्ते । **गयापालकाः** वसन्ति[७] । **प्रयागपालकाः** अपि गच्छन्ति ।

अन्ये नीचजातीया वर्त्तन्ते । नापिताः[८] सन्ति । रजकाः सन्ति । कुलालाः वर्त्तन्ते । शिल्पिनः सन्ति[९] । वणिजस्तिष्ठन्ति । पटकाराः[१०] सन्ति । मागधाः सन्ति । अन्ये पण्यजीविनो[११] बहवः सन्ति । यवनाः प्रवर्त्तन्ते । चण्डालाः वर्त्तन्ते । वंशस्फोटकाः वर्त्तन्ते । धीवराः सन्ति । वनेचराः[१२] सन्ति । व्याधाः वर्त्तन्ते । कुसुमोपजीविनः[१३] सन्ति । जटिलाः[१४] वर्त्तन्ते । तापसाः सन्ति वैरागिणः सन्ति । भैरवोपासकाः[१५] सन्ति । नटाः सन्ति । नर्त्तकाः सन्ति । वेश्याः[१६] सन्ति । वेश्योपजीविनः सन्ति । मन्त्रिकाः सन्ति[१७] । व्यवसायिनो बहवस्तिष्ठन्ति । धनिका बहवो वर्त्तन्ते । वैद्याः सन्ति । ज्योतिर्विदः सन्ति । एवंविधा सर्वजातीया जनास्तत्र वसन्ति[१८] । स्वामिनः, भूरि किं वक्तव्यं, पृथिव्यां ये विशिष्टाः पदार्थाः वर्त्तन्ते ते सर्वे तत्र विद्यन्ते । ”

“ एवं वा तर्हि अतिसमीचीनो देशस्तिष्ठति । तर्हि मयाऽपि एकवारं गन्तव्यम् । अत्र गङ्गासागरे स्नानं विधाय, अग्रे पुरुषोत्तमस्य दर्शनं कृत्वाऽऽगन्तव्यम् । चातुर्मास्यं विधाय गमिष्यामि ।”

“ तर्हि गन्तव्यं स्वामिनः, सर्वं द्रष्टव्यम् । ”

‘ भवतु ’ इत्युक्ते सति भूयः यजमान उवाच —

“ स्वामिनः भवतां पूर्वाश्रमे को वा ग्रामः । ”

“ अरे, पूर्वाश्रमे अस्माकं कर्नाटकदेशे चंजीग्रामः[१९] । ”

---

१ O omits शफर्यः सन्ति. २ B omits नौचारिणः......कैवर्तकाः सन्ति. ३ O adds बहुविधाः जनाः वर्त्तन्ते, obviously from below. ४ O and C—काणवाः B—कान्नवाः. ५ C and B—पाश्चात्याः. ६ B omits मागधीयाः....त्रिहूतनाः सन्ति । ७ C reads for प्रयागपालकाः etc., गयापालकाः तत्र गच्छन्ति । गंगापुत्राः तत्र आगच्छन्ति. ८ O—नापिताः. ९ O adds गुयापालिकठः before शिल्पिनः, obviously a scribal error of rewriting गयापालकाः of the line above. C—adds after शिल्पिनः सन्ति—चित्रकारिणस्तिष्ठंति, जंतुपाला वर्त्तते । स्वर्णशिल्पिनः अयसशिल्पिनः and before वणिजस्तिष्ठंति । १० O—पठुकाराः, C—पट्टकाराः ११ O—अन्योपजीविप्रो बहवः C—अन्येप्यजीविनो. १२ C—वनेचराः १३ O—कुसुंभोपजीविनः B—कोसुमोप० १४ O—बदिलाः १५ C—भैरवपालकाः १६ C—कुटलाः O—वैश्याः १७ B—omits. १८ B—omits एवंविधा etc. १९ O—**चंदि०** C—**वीजापूर०**

" एवं तर्हि पूर्वाश्रमे श्रीमतां का वा वृत्तिः स्थिता, भिक्षुकवृत्तिः स्थिता वा[१] व्यवसायवृत्तिः स्थिता ।"

" अरे तत्किमपि मा पृच्छ । तत्किमपि वक्तुम् नोत्सहेऽहम् ।"

" न हि स्वामिनः मम श्रोतुमिच्छा वर्त्तते । श्राव्यमेव ।

" अरे, मया पूर्वाश्रमे व्यवसायवृत्त्या स्थितम् । यदा दिल्लीश्वरस्य[२] अमात्यः असत्खान[३] इति । तस्य पुत्रः जुल्फकारखानः[४] । स यदा दिग्विजयार्थमागतस्तदा तस्य निकटे मया भूरि दिवसपर्यन्तं व्यवसितम्[५] । तदा अस्माकं निकटे सहस्रद्वयमश्वचाराः स्थिताः । दशसहस्रपादचाराः स्थिताः । चत्वारिंशद्दन्तिनः स्थिताः । बहवो उष्ट्राः स्थिताः[६] । बहवो रथाः स्थिताः । तदा मद्गृहे चतस्रः पल्यङ्क्यः[७] स्थिताः । कतिशो भारवाहकाः शकटाः स्थिताः । पूर्वमस्माकं गृहे षोडश दास्यः अतिसुन्दर्यः स्थिताः । तासां लावण्यं वर्णितुं न शक्नुमः[८] । तादृशीः मम गृहिण्यः अपि नासीत् । ताः सर्वाः मम सेवायां अतितत्पराः स्थिताः । तासु एका अतिशोभना स्थिता । तस्याः गुणाः सौन्दर्यं किं वर्णनीयम् । केवलमपरा देवाङ्गनेव स्थिता । तस्यां मम रुचिरतीव स्थिता । मां विना तस्या अपि मनः कुत्राऽपि न गतम् ।

अरे पूर्वं मम निकटे कतिशो वाराङ्गनाः स्थिताः । ताः मम बाहूनामन्तिके सदैव आसन् । तास्वपि एका अतीव लावण्यवती स्थिता । तस्यामतीव कौशल्यं स्थितम् । तस्याः कण्ठस्य माधुर्यं नृत्यगीतादिकं तथा आलापाम्भिनयाँश्चैव वर्णितुं नैव शक्यते । अधुनाऽपि यदा तस्याः स्मरणं जायते तदा मम मनः कुत्राऽपि न लगति । तत्किं वक्तव्यं यज्जातं यद्गतं स्वप्नवत्स्मरणम् ।

अरे पूर्वं मद्गृहे प्रत्यहं शतशः ब्राह्मणाः भोक्तारः स्थिताः । तैः साकं मया मुहूर्त्ताभ्यन्तरमेव भोक्तव्यम् । तथैव बहवो अन्नार्थिनः । तथैव वस्त्रार्थिनः[९] । तथा कतिशो याचकाः । अन्येऽपि ये ये अर्थिनः मां प्रति आगतास्तेषां सर्वेषां मनोवांछितं मया दत्तम् । मम प्रभुतायां सत्यां मत्सकाशात्कोऽपि निराशतया नाऽगमत् । पूर्वं मे तादृशी[१०] विभूतिः स्थिता । अधुना अनुभूतमपि तत्सर्वं स्वप्नप्रायं भासते । तस्य स्मरणे महती व्यथा जायते ।"

" तर्हि स्वामिनः पूर्वमेतादृशं वैभवं स्थितम् । सहसा तत्सर्वं कुत्र गतम् । तत्र किं कारणं जातम् ।"

---

१ C—omits भिक्षु......वा. B—omits भिक्षुक......व्यवसायवृत्तिः स्थिता. २ C—इन्द्रप्रस्थेश्वरस्य. O—दिल्लीधरस्य ३ B—असतवान C—असतवात. ४ C—जुलुफदारखार O—जुलुपगारखान ५ O—विसृतं B—व्यवयितं. ६ O—omits ७ O—पल्यक्य: C—पल्यंक: ८ C adds after this:—सा कथंभूता । पद्मनेत्रद्वयं, यस्याः वक्त्रं चेन्द्रोपमं शुभम् । स्मरपा (?) शोभौ (स्मरोपमशुभौ ?) कर्णौ, कप(पा)लौ चन्द्रकोज्वलौ, नासिका तिलपुष्पाभा, कामचापोपमौ भ्रुवौ । दशनाः हीरकैस्तुल्याः । ह्रिडुमो (दाडिमो)पमितधरा(मितौ अधरौ)। मयूरस्य कलापेन तुल्यं कचनिबन्धनं शंखरेखात्रयेणाऽपि कंठदेश (शो) विराजते । स्वल्पकं मध्यदेशं च मुष्टिग्राह्यं तु केवलम् । नाभिमंडलमध्यस्थं लावण्यं केन गृह्यते ॥ रंभोपमौ उरूजंघे भुजौ कमंडल(कमल)दंडकौ । चरणं स्थलकमलाभं मणिमंडितनूपुरं । इत्यादि मम गृहिणीपि नासीत । C—seems to be later than both B and O as it reads बीजापूरग्रामः for चंजी above. As both B and O omit this passage, the passage may be a later addition. ९ B omits. १० C—पूर्वं एतादृशी.

" अरे शृणु । मया कस्मिंश्चिद्दिने योषिद्भिः सह रहसि सौधान्तरे स्थितम् । तस्मिन्काले मम प्रभुणा आकारितम् । द्विवारं दूतः प्रेषितः । मया [1]सौन्दर्यवशात्सुखोत्पत्तिं त्यक्त्वा न गतम् । तदा भूयोऽपि अनुचरः प्रेषितः । तथाऽपि मया न गतम् । इति कारणात्सः अतीव क्रुद्धः । तेन अकस्मात् एकसमयावच्छेदेन सहस्रचतुष्टयाश्वचाराणां सेनानीः प्रेषितः[2] । तदा ममानुयायिनः असन्नद्धाः[3] स्थिताः । तदा तेन घटिकाद्वयाभ्यन्तरं सर्वं लुण्ठितम् । मामपि गृहीत्वा चतुर्भुजं विधाय[4] नीतम् । तदा प्रभुणा अतीव निर्भर्त्सितम् । मासचतुष्टयपर्यन्तं तस्य कारागृहे स्थितम् । पश्चाच्छृंङ्खलामोचनं जातम् । तद्दिनादारभ्य मम मनसि अतीव अनुतापो जातः । तदा अहं सर्वं कुटुम्बादिकं त्यक्त्वा कुरुक्षेत्रं गतः तत्र कियद्दिनपर्यन्तं तपोऽनुष्ठितम् । तत्रैव संन्यासो गृहीतः । पश्चादिहागतम् । "

" तर्हि स्वामिनः, श्रीमतां तुर्याश्रमं गृहीत्वा कतिवर्षाणि जातानि । "

" अरे मम द्वादशवर्षाणि[5] जातानि । एतावद्दिनपर्यन्तं मया तीर्थाटनं कृतम् । साम्प्रतं मासचतुष्टयं जातमिहागत्य । अधुना सर्वं त्यक्त्वा मणिकर्णिकां सेवयामि । "

" एवं तर्हि सम्यक् क्रियते स्वामिनः ।

विश्वेश्वरसमो देवः क्षेत्रं वाराणसीसमम् ।
मणिकर्णिकासमं तीर्थं नास्ति ब्रह्माण्डगोलके ॥

एवमुक्तं वर्त्तते इति कृत्वा भवत्सदृशामेतादृशं क्षेत्रं विहाय अन्यत्र वासोऽनुचितः । "

" सत्यमुच्यते त्वया । ममाऽपि मनसि एवमेव वर्त्तते । कुत :—

असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काशीवासः[6] सतां सङ्गो गङ्गाम्भः शम्भुपूजनम्[7] ॥

एतादृशं स्थलं विहाय अन्यत्र गन्तुमुचितं वा नहि । "

" स्वामिनः सत्यम् " इत्युक्ते सति स्वामिन ऊचुः —

" अरे मया अतः परं मठं प्रति गम्यते । ममाऽद्य भूरि कालक्षेपो जातः । गीतापाठोऽपि न कृतः ।[8] मम अनुष्ठानस्य समयो जातः अतः परं गन्तव्यमेव । "

इत्युक्त्वा स्वामिनः उत्थिताः । तदा यजमानेन स्वामिनां साष्टाङ्गं प्रणामं विधाय यतिवर्यैस्सह कतिचित्पदानि गतम् ।[9] ईषद्दूरं गत्वा स्वामिनो[10] विज्ञापितवान्—

---

१ C—सौकर्यवशात्. O—सौकार्यवशात्. २ O—॰सहस्रचतुष्टयाश्वचराणां सेना प्रेषिता । ३ B and O—सन्नद्धाः. O omits मम. ४ C—ममापि गृहीत्वा चतुर्भुजं विधाय॰ B—मामपि गृहीत्वा भुजबन्धनं विधाय॰ ५ C—॰द्वादशचातुर्मास्यानि मम जातानि । ६ C—काश्यां वासः. ७ C—शिवपूजनं. ८ C adds here—**सप्तशती**पाठोपि न कृतः । **विष्णुस्तवराज**पाठोपि न कृतः । **विष्णुसहस्रनामस्य** पाठोपि न कृतः । **गजेन्द्रमोक्षस्य** पाठोपि न कृतः । **भीष्मस्तवराज**पाठोपि न कृतः । The passage, like the description of female beauty given by C above, may be a later interpolation. The passage is omitted by both B and O. ९ C—तदा यजमानः.....गच्छति । १० C and O—स्वामिनां.

" स्वामिनः, अद्य[१] भूरि श्रमितम् । अतीवकालो[२] जातः । क्षन्तव्यम् स्वामिनः ।"

" नारायण नारायण, इदं किमुच्यते । एतादृशं भिक्षासौकर्यं कुत्राऽपि न भविष्यति । एतादशी भक्तिः कस्याऽपि न स्यात्[३] ।

यादृशी भावना यस्य [४]सिद्धिर्भवति तादृशी ।"

" स्वामिनः सर्वं श्रीमतां प्रसादात् । अतः परं शनैः शनैः गन्तव्यम् ।"

इत्युक्ते सति स्वामिभिरनुज्ञातः सन् पश्चान्निवृत्तः । तदा स्वामिनः कमण्डलुं कुत्रचिन्निक्षिप्य दण्डयष्टिमवलम्ब्य शनैः शनैरतिकष्टेन स्वमठं प्रति गताः[५] । मठं गत्वा शिष्यं प्रति ऊचुः—

" अरे मेषाश्रम, त्वं शीघ्रमुत्तिष्ठ । तूर्णमास्तरणं विधेहि ।"

अथ तेनोच्यते—" स्वामिनः अनुष्ठानस्य समयो जातः । इदानीं निद्रा कथं विधीयते ।

" अरे त्वं तूष्णीमास्तरणं विधेहि । एकं व्यजनमा[६](वीजनमा)द्रीकृत्य मां वीजय । शरीरे अतीव दाहो जायते ।"

" तर्हि, स्वामिनः अद्य किं किं भुक्तम् ।"

" अरे अधुना किमपि मा पृच्छ । पश्चाद्वक्ष्यामि । अधुना वक्तुं न शक्यते । स्थातुमपि न शक्यते ।"

एवमुक्त्वा स्वामिषु शयितेषु सत्सु ततः यजमानः किमाचरितवान्तदाह । यजमानः पुनस्त्रियमुवाच—

" अयि शृणोषि । अद्य त्वमपि श्रमिताऽसि । अहमपि श्रमितोऽस्मि इति कृत्वा अद्य अट्टालोपरि[७] तूर्णं शय्यां विरचय । सर्वानर्भकान्स्वापयित्वा[८] त्वमपि शीघ्रमुपरि आगच्छ । आदौ मम सन्ध्यावन्दनार्थमुदकं देहि ।"

इत्युक्ते सति तया एवमेव कृतम् । सन्ध्यार्थमुदकं दत्तम् । तस्मिन्सन्ध्यामनुष्ठितवति सति शीघ्रमुपरि गत्वा पर्यङ्कोपरि[९] आस्तरणमास्तृतं[१०] तदुपरि मल्लिकाकुसुमानि विकीर्य तदुपरि अतिशुभ्रं चीनांशुकमास्तीर्य शिरोदेशे कण्डुद्वयं[११] संस्थाप्य पर्यङ्कस्याधोदेशे ताम्बूलसाधनादिकं सर्वं निक्षिप्य स्वामिनः समर्पयत्[१२] । तदा सः सन्ध्यां विधाय उपरि गतः[१३] । पर्यङ्कोपरि उपविश्य स्त्रियमाकारितवान् ।

" अये त्वं शीघ्रमुपरि आगच्छ । अधः किं करोषि ।"

इत्युक्ते सति सा अपत्यादीन्यथास्थानं स्थापयित्वा स्वयमुपरि आगता । तदा सः तां निरीक्ष्य

---

१ O—अति. २ O and C—अतिकालो. ३ C—भक्तिरपि० B—omits कस्यापि. ४ C—बुद्धिर्भवति० ५ O omits तदा स्वामिनः.... गताः । B—०दंडमप्यवलंब्य० B—मठं प्रति गतः । ६ O—व्यंजन० B—विजयमार्द्रीं० C—व्यजन० ७ C—अट्टालीकोपरि. ८ C—सर्वानर्भकान् अधः स्थापय त्वमपि शीघ्रमु० O—सर्वानर्भकान् अधः स्थापयित्वा० ९ C—पल्यंकोपरि. १० O—आस्तीर्णमास्तृतं. B—पर्यंकोपरि आस्तरयामास. ११ C—कटुकद्वयं. B—गेडुकद्वयं. १२ B—स्वामिनमाख्यात. C—स्वामिनमारव्यत. १३ B—आगतः.

सविलासमुवाच—

"पानीयं पातुमिच्छामि त्वत्तः कमललोचने ।
यदि दास्यसि नेच्छामि नो दास्यसि पिबाम्यहम् ॥[१]"

इति श्रुत्वा तया उदकं दत्तम् । तेन जलं पीत्वा पुनरुक्तं—

"पर्णानि स्वर्णवर्णानि कर्णान्तायतलोचने ।
चूर्णमानीयतां तूर्णं पूर्णचन्द्रनिभानने"[२] ॥

इत्युक्ते सति तया सोपस्कृता ताम्बूलवीटिका दत्ता । तदा तेन तस्याः पाणिमवलम्ब्य तां क्रोडे उपावेशयत् । ततस्तां दोर्भ्यामुपगूह्य[३] तस्या वदनं चुचुम्ब । ततस्तावुभौ तदूर्ध्वं उत्तरक्रीडां चक्राते[४] ।

[इति] [५]**श्रीरङ्गभट्टसुत धुण्डिकवीश्वरेण** [विरचिता] **गीर्वाणशब्दमञ्जरी** [।] **समाप्तेऽयं** गीर्वाणपदमञ्जरी ॥ ॥ श्री ॥ विश्वेश्वर प्रसन्न ॥

---

१ C adds—अन्यच्च ।

स्वच्छं सज्जनचित्तवल्लघुतरं दीनार्तिवत् शीतलं
पुत्रालिंगनवत्तथैव मधुरं बालस्य संजल्पवत् ।
एलोशीरलवंगचंदनलसत्कर्पूरकस्तूरिका—
जातीचंपकपाटलात्यु(भि)रसितं पानीयमानीयताम् ॥

२ C adds—तद्यथा

नालाकारपयोधरे तनुभवत्तंत्राधिकारक्रिये
नाभ्य(भि)मध्यतले तडित्समरुचे तत्री(तन्त्री)समालापिनी ।
ताटंका नितरां कृताक्षियुगले तन्वंगि ताम्रो(म्रा)धरे
तारानाथनिभानने तव करा(रात्) तांबूलमानीयताम् ॥

३ O—॰मुपगृह्य.

४ B—चक्रे ।

५ C—॥ इति भाषामंजरि समाप्ता ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥
B—श्री रंगमदसुत धुंदिकवीश्वरेण गीर्वाणपदमंजरी सादरेण नीता संपूर्णं ॥ * ॥ श्री ॥